# APPENDIX-6

## 6.1 CLASSICAL AYURVEDIC REFERENCES

### आढ़की (मूल)

आढ़की कफ पित्तघ्नी वातला,

(च.सू.अ. 27/33)

आढ़की तुवरा रुक्षा मधुरा शीतला लघुः ।
ग्राहिणी वातजननी वर्ण्या पित्तकफास्रजित् ।।52।।

(भा.नि., धान्यवर्ग, 52)

आढ़की कफ पित्तघ्नी किं चन्मारुतकोपनी ।
कषाया स्वादु संग्राही कटुपाका हिमा लघुः ।।83।।
मेदः श्लेष्मास्रपित्तेषु हिता लेपोपसेकयोः ।

(ध.नि. धान्यानि वर्ग, 83)

आढ़की तु कषाया च मधुरा कफपित्तजित् ।
ईषद्वातकरा रुच्या विदुला गुरूग्राहिका ।।101।।

(रा.नि.शाल्यादि वर्ग, 101)

## अग्निमंथ (मूल)

अग्निमंन्थ ---------------------- गोक्षुरका इति दशेमानि श्वयथुहराणि भवन्ति ।

(च.सू.,अ.4; 38)

अग्निमन्थ श्योनाका इति दशेमान्यनुवासनोपगानि भवन्ति ।।

( चरक सू., अ. 4.26)

अग्निमन्थो जयः सस्याच्छीपर्णो गणिकारिका ।<br>
जया जयन्ती तर्कारी नादेयी वैजयन्तिका ।।<br>
अग्निमन्थः श्वयथुनुद्वीर्योष्णः कफवातहृत् ।<br>
पाण्डुनुत्कटुकस्तिक्तस्तुवरो मधुरोऽग्निदः ।।

(भा.प्र.,गुडुच्यादि वर्ग ; 23.24)

अग्निमन्थोऽग्निमन्थनस्तर्कारी वैजयन्तिका ।<br>
वह्निमन्थोऽरणी केतु : श्रीपर्णीकर्णिका जया ।।<br>
तर्कारी कटुकातिक्तातथोष्णाऽनिलपाण्डुजित् ।<br>
शोफश्लेष्माग्निमान्द्याम विबन्धाश्च विनाशयेत् ।।

(धन्व.नि., गुडुच्यादि वर्ग- 108- 110)

अग्निमन्थो गुणैस्तद्वद्विशेषाद्वात शोफहा ।

(कै. नि., ओषधिवर्ग, 27.)

अग्निमन्थो मथः केतुररणिर्वैजयन्तिका ।<br>
अग्निमन्थः श्वयथुहद्वीर्योष्णः कफवातनुत् ।।

(म.नि.,अभयादि वर्ग; 46)

## अम्बठकी (मूल)

1. अम्बष्ठाघातकी कुसुमसमंगाकट्वंगमधुक बिल्वेपेशिका-
सावररोध्रपलाश नन्दीवृक्षाः पहनकेशराणि चेति ।(46)
गणौ प्रियंग्वम्बष्ठादी पक्वातीसारनाशनौ ।
सन्धानीयौ हितौ पित्ते व्रणानां चापि रोपणौ ।(47)
(सु.सं सूत्र 38/46-47)

2. अम्बष्ठा मधुकं नमस्करी नन्दीवृक्षापलाश कच्छुराः ।
रोध्रंधातकि बिल्वपेशिके कट्वङ्ग कमलोभ्द्वं राजः ।(38)
गणौ 'प्रियङ्ग्वम्बष्ठादी' पक्वातीसारनाशनौ ।
सन्धानीयौ हितौ पित्ते व्रणानामपि रोपणौ (39)
(अ.ह.सूत्र 15/38-39)

3. अम्बाष्ठा सा कषायाम्ला कफकण्ठरूजापहा।
वातामयबलासहनी रूचिकृद्दीपनी परा।(79)
(रा.नि.शताह्वादि वर्ग, 79)

4. अम्बाष्ठा मधुरा तिक्ता लघ्वम्ला रसपाकयो।
कफपित्तहरा कण्ठया पक्वातीसारनाशिनी।(784)
(कै.नि.ओषधिवर्ग, 784)

## आम्र (बीज मज्जा)

आम्रश्चूतो रसालश्च सहकारोऽतिसौरभः ।
कामाङ्गो मधुदूतश्च माकन्दः पिकवल्लभः ।।
आम्रबीजं कषायं स्याच्छर्धतीसारनाशनम् ।
ईषदम्ल च मधुरं तथा हृदयदाहनुत् ।।
(भा.प्र.आम्रादिफलवर्ग17)

रूक्षश्चूतस्य संग्राही कृमिवातप्रकोपणः ।
कषायमधुरो मज्जा, ग्राहिणी त्वक् च दाहनुत् ।।
(कै.नि. औषधि वर्ग;343)

## आम्र (शा.त्वक्.)

आम्र त्वचा कषाया च मूलं सौगंधि तादृशम् ।
रुच्यं संग्राहि शिशिरं ।

(रा.नि.आम्रादि वर्ग, 23)

आम्रान्तस्त्वग् ग्राहिणी तु तुवरा दाहकारिणी ।
पित्तमेहकफानाहनाशिनी योनिशुद्धकृत् ।।

(निघण्टु रत्नाकर)

रक्तातिसारे ------------ आम्रार्जुनत्वचः ।

(वृन्द)

## आम्रात (शाखा)

आम्रातक:पीतनश्च मर्कटाम्र: कपीतन: ।
आम्रामम्लं वातघ्नं गुरूष्णं रूचिकृत्सरम् ।19।।
पक्वन्तु तुवरं स्वादु रसे पाके हिमंस्मृतम् ।
तर्पणं श्लेष्मलं स्निग्धं वृष्यं विष्टम्भि बृहंणम् ।।
गुरू बल्यं मरूत्पित्तक्षतदाहक्षयास्रजित् ।।20।।

(भा.प्र., आम्रादि फल वर्ग, 19-20)

आम्रातक: पीतनक: कपिचूतोऽम्लवाटक: ।
श्रृंड्.गी कपी रसाढ्यश्च तनुक्षीर: कपिप्रिय: ।।9।।
आम्रातकफलं वृष्यं पित्तास्रकफवह्निकृत् ।
शीतं कषायं मधुरं किन्चिन्मारूतकृद्गुरू ।।10।।

(धन. नि., आम्रादि वर्ग 9-10)

आम्रातकस्तनुक्षीरो वर्षापाकी फलीशक: ।।409।।
कपिचूतश्चाम्रवटो दुष्फलोऽथ कपीतन: ।
आम्रातमम्लं वातघ्नं रुच्यं पित्तकफास्रकृत।।410।।
सरं गुरूष्णं पक्वं तु स्वादुपाकरसं हिमम् ।
तर्पणं श्लेष्मलं स्निग्धं वृष्यं विष्टंभि बृंहणम।।411।।
गुरू:बल्यं मरुत्पित्तदाहक्षतक्षयास्रजित् ।
आम्रातकप्रबालं तु ग्राहि दीपनरोचनम् ।।412।।

(कैयदेव निघण्टु, औषधि वर्ग 409-412)

## अपामार्ग (मूल)

1. अपामार्गः सरस्तीक्षणो दीपनस्तिक्तः कटुः ।
पाचनो रोचनश्छर्दि कफमेदोऽनिलापहः ।
निहन्ति हृद्रुजाध्मार्शः कण्डूशूलोदरापचीः ।।220)।।

(भा.प्र.नि.,गुडुच्यादिवर्ग, 220)

2. अपामार्गस्तु तिक्तोष्णः कटुश्च कफनाशनः ।
अर्शः कण्डूदरामघ्नो रक्तहृदग्राहिवान्तिकृत्।।262।।

(ध.नि. गुडुच्यादि वर्ग, 262)

3. प्रत्यकपुष्पा शिरोविरेचनानां ।।

(च.सू. 25/40)

## अरलुक (शा.त्वक्.)

महानिम्बो हिमो रुक्षस्तिक्तो ग्राही कषायकः ।।98।।
कफपित्तभ्रमच्छर्दि कुष्ठहल्लास रक्तजित् ।
प्रमेह श्वास गुल्माशों मूषिका विषनाशनः ।।99।।
(भा.प्र.गुडूच्यादि वर्ग; 98-99)

अरलुः कफहृद्ग्राही दीपनः कृमिकुष्ठहृत् ।
कटुकः शीतलः तिक्तो बस्तिरोगहरः परः ।।
(नि. रत्नाकर)

श्योनाकयुगलं तिक्तं शीतलं च त्रिदोषजित् ।
पित्तश्लेष्मातिसारघ्नं सन्निपातज्वरापहम् ।
[(रा.नि.)प्रभद्रादिवर्ग,30]

## अर्क (शा.त्वक्.)

----- अर्क इति भेदनीयानि भवन्ति ।4।
----- अर्क इति स्वेदोपगानि भवन्ति ।22।
(च.सू. 414,22)

अर्कस्तु कटुरूष्श्च वातह्वद्दीपन: सर: ।
शोफव्रणहर: कण्डूकुष्ठप्लीहकृमीन्जयेत् ।।13।।
(ध.नि.करवीरादिवर्ग 13)

अर्क: क्षीरदल: पुच्छी प्रताप: क्षीरकाण्डक: ।
विक्षीरो भास्कर क्षीरी खर्जूघ्न: शिवपुष्पक: ।।126।।
सूर्याह्वश्चच सदापुष्पो रविरास्फोटकस्तथा ।27
अर्कस्तु कटुरूष्णश्च्च वातजिद्दीपनीयक: ।।
शोफव्रणहर: कण्डू कुष्ठक्रिमिविनाशन: ।।128।।
(रा.नि.,करवीरादि वर्ग, 126-128)

अर्कद्वयं सरं वातकुष्ठविषव्रणान ।
निहन्ति प्लीहगुल्मार्श: श्लेष्मोदरार्शकृमीन् ।।69।।
(भा.प्र.नि.,गु.वर्ग.69)

## असन (शा.त्वक्.)

यथा सर्वाणि कुष्ठानि हतः खदिरबीजकौ ।

(सु.सू., 6/19)

असनादिर्विजयते श्वित्रकुष्ठकफक्रिमीन् ।
पाण्डुरोगं प्रमेहं च मेदोदोषनिबर्हणः ।।20।।

(अष्टांगहृदय सू. 15/20)

बीजकः पीतसारश्च पीतशालक इत्यपि ।
बन्धूकपुष्पः प्रियकः सर्जकश्चासनः स्मृतः ।।28।।
बीजकः कुष्ठवीसर्पश्वित्रमेहगुदक्रिमीन ।
हन्ति श्लेष्मास्रपित्त च त्वच्यः केश्यो रसायनः ।।29।।

(भा.प्र.नि., वटादिवर्ग, 28-29)

असनः कटुरुष्णश्च तिक्तो वातार्त्तिदोषनुत् ।
सारको गलदोषघ्नो रक्तमण्डलनाशनः ।।133।।

(रा.नि., प्रभद्रादिवर्ग,133)

बीजकः सकषायश्च कफपित्तास्रनाशनः ।।115।।

(ध.नि., आम्रादि वर्ग 115)

## अस्थिसंहत (शाखा)

अस्थिसंहारकः प्रोक्तो वातश्लेष्महरोऽस्थियुक्।
उष्णः सरः कृमिघ्नश्च दुर्नामघ्नोऽक्षितरोगहत।।
रुक्षः स्वादुर्लघुर्वृष्यः पाचनः पित्तलः स्मृतः।
भिषग्वरैर्यथानामफलं चापि प्रकीर्कित्ततम्।।
(भा.प्र.नि.226-227 गुडुच्यादि वर्ग)

वज्रप्रोक्तास्थिसंहारो वज्रांगी क्रोष्टुघंटिका।।1593।।
अस्थिश्रृङ्खलिका ज्ञेया ग्रंथिला वज्रवल्लरी।
वज्रवल्ली सरा रुक्षा कृमिदुर्नामनाशिनी।।1594।।
दीपन्युष्णा विपाके च स्वाद्वी वृष्या बलप्रदा।
अस्थिसंधान जननी वातश्लेष्महरा गुरूः।।1595।।
(कैयदेव निघण्टु, ओषधिवर्ग, 1593-95)

## आत्मगुप्ता (बीज)

कपिकच्छूफलं वृष्यं शीतं स्वादुरसं गुरू ।
रक्तपित्तानिलहरं दुष्टव्रणविशोधनम् ।।609।।
(कै.नि. औषधि वर्ग 609)

कपिकच्छूरात्मगुप्ता वृष्या प्रोक्ता चमर्कटी ।
अजडा कण्डुरा व्यङ्गा दु:स्पर्शा प्रावृषायणी ।।129।।
लाङ्गली शूकशिम्बी च सैव प्रोक्ता महर्षिभि: ।
कपिकच्छूर्भृशं वृष्या मधुरा बृंहणी गुरू: ।
तिक्ता वातहरी बल्या कफपित्तास्त्रनाशिनी ।।130।।
(भा.प्र. नि.,गुडूच्यादि वर्ग;129-130)

## भारङ्गी (मूल)

1. भार्गी भृगुभवा फञ्जी ब्राह्मणयष्टिका।
ब्राह्मण्यंगारवल्ली च खरशाकश्च हञ्जिका।।182।।
भार्गी रूक्षा कटुस्तिक्ता रूच्योष्णा पाचनी लघुः।
दीपनी तुवरा गुल्मरक्तनुन्नाशयेद् ध्रुवम्।।

शोथकासकफश्वासपीनसज्वरमारूतान्। 183।
(भा.प्र.नि.,हरितक्यादि वर्गः182-183)
भार्गी गर्दभशाकं च पद्मा ब्राह्मयष्टिका।
अङ्गारवल्ली फञ्जी च सैव ब्रह्मासुवर्चसा।।
शक्रमाता च कासघ्नी भृङगजाभार्गवा मता।

भार्गी स्यात् स्वरसे तिक्ता चोष्णा श्वासकफापहा।
गुल्मज्वररासृग्वातघ्नी यक्ष्माणं हन्ति पीनसम्।(68)
(धन्व.नि., गुडुच्यादि वर्ग 67-68)

खरशाकं शुक्रमाता भार्गी ब्राह्मणयष्टिका।
फंजी पद्माऽङगारपर्णी महागर्दभगन्धिका।।(1134)
भृगुजा भंगुरा हंसी पालिंदी मार्गपर्वणी।
भार्गी तिक्ता कषायोष्णा दीपनी पाचनी लघुः।।(1135)
कटूवी रूक्षा ज्वरश्वासकासशोफकफानिलान्।
पीनसारूचिगुल्मास्त्रयक्ष्माणं विनियच्छति।।(1136)
(कैयदेव नि., औषधि वर्ग1134-1136)

## बीजपूर (फल)

शूलेऽरुचौविबन्धे च मन्देऽग्नौ मद्यविप्लवे। हिक्काश्वासे च वन्यां वर्गोगदेषु च ।
वातश्लेष्मसमुत्थेषु सर्वेष्वेपदिश्यते । केसरं मातुलुंङ्गस्य लघु शेषमतोऽन्यथा ।। 148।।
(च. सू. स्थान,अध्याय ....,148)

लघ्वम्लं दीपनं हृद्यं मातुलुंड्.गमुदाहतम्। त्वक् तिक्ता दुर्जरा तस्य वातकृमिकाफापहा ।।149।।
स्वादु शीतं गुरू स्निग्धं मांसं मारूतपित्तजित्। मेध्यं शूलानिलच्छर्दिकफारोचकनाशनम्।।150।।
दीपनं लघु संग्राहि गुल्मार्शोघ्नं तु केसरम्। शूलाजीर्णविबन्धेषु मन्देऽग्नौ कफमारूते।।151।।
(सु.सू.,अ.46;149-151)

बीजपुरो मातुलुंङ्गो रूचकः फलपूरकः। बीजपूरफलं स्वादु रसेऽम्लदीपनं लघु।।(130)
रक्तपित्तहरं कण्ठजिह्वाहृदयशोधनम्। श्वासकासरूचिहरं हृद्यं तृष्णाहरं स्मृतम्।।(131)
(भा.प्र.नि.,आम्रादिफलवर्ग, 130-131)

बीजपूरफलमम्लकटूष्णं श्वासकासशमनं पाचनं च।कण्ठशोधनपरं लघु हृद्यं दीपनं च रूचिकृज्जरणं च।।148।
(रा.नि.आम्रादिवर्ग; 148)

श्वासकासारूचिहरं तृष्णाघ्नं कण्ठशोधनम्। लघूष्णं दीपनं हृद्यं मातुलुंड्.गमुदाहतम्।।19।।
त्वत्तिक्ता दुर्जरा तस्य वातकृमिकफापहा। स्वादु शीतं गुरू स्निग्धं मांसं मारूतपित्तकृत्।।20।।
मेध्यं शूलार्तिच्छार्दिघ्नं कफारोचकनाशनम्। दीपनं लघु संग्राहि गुल्मार्शोघ्नं तु केशरम्।।21।।

पित्तमारूतकृदबल्यं दीपनं वृद्धकेशरम्। हृदयं वर्णकरं रूच्यं रक्तमांसबलप्रदम्।।22।।
शूलाजीर्णविबन्धेषु मन्दाग्नौ कफमारूते। अपची श्वास कासेषु रसस्तस्योपयुज्यते।।23।।
रसोऽतिमधुरो हृद्यो शुक्रपित्तानिलापहः। कफकृद्दुर्जरा पाके मातुलुंड्.गजटा कटुः।।24।।
मूल चैव कृमिन्हन्ति पुष्पं बीजं च गुल्मजित्। (धन्व.नि., आम्रादि वर्ग19-24)

लुंड्.गं पित्तकरं हृद्यं रूच्याम्लं दीपनं लघु। ।।254।।
(पित्तास्त्रदूषणं रुच्यं जिह्वास्यकण्ठशोधनम्)
उष्णं वातकफश्वासकासतृष्णावमिप्रणुत्।।255।।
तद्रसः पार्श्वहृदबस्तिशूलश्लेष्मसमीरणाम्।
कासश्वासारूचिच्छर्दिवह्निमान्द्यं निमच्छति।।258-259।।
(कैयदेव नि., 254, 255,258-259)

## बिल्व (मूल)

जटा दोषवमीकृच्छंशूलघ्नी मधुरा लघुः।
कफवातामशूलघ्नो ......................।।20।।

(कै.नि. औषधि वर्ग, 20)

बिल्वमूलं त्रिदोषघ्नं छर्दिघ्नं मधुरं लघु ।।106।।

(ध.नि., गुडुच्यादि वर्ग106)

## बिम्बी (सं. व.)

बिम्बी रक्तफला तुण्डीतुण्डकेरी च बिम्बिका ।
ओष्ठोपमफला प्रोक्ता पीलुपर्णी च कथ्यते ।।73।।
बिम्बीफलं स्वादुशीतं गुरू पित्तास्रवातजित् ।
स्तभनं लेखनं रुच्य विबन्धाध्मानकारकम् ।।74।।
(भा.प्र., शाकवर्ग; 73-74)

तुण्डिका कफपित्तासृक्शोफपाण्डुज्वरापहा ।
श्वासकासापहं स्तन्यं फलं वातकफापहम् ।।201।।
(धन्वंतरी नि.; गुडुच्यादि वर्ग 201)

बिम्बी तु मधुरा शीता पित्तश्वासकफापहा ।
असृग्ज्वरहरा रम्या कासजिद्गृहबिम्बिका ।।
(रा.नि., मूलकादिवर्ग; 190 )

तुण्डिका कफपित्तासृक्शोथपाण्डुज्वरापहा ।
श्वासकासापहं स्तन्यं फलं वातकफापहम् ।।
तिक्तं प्रसूनं पित्तध्नं तत्परं कामलापहम् ।
(कै.नि. ओषधि वर्ग,585)

तिक्ताबिम्बीफलं तिक्तं पित्तघ्नं वातकोपनम् ।।586।।
विषघ्नं अतिरुच्यं स्यात् गुरू श्लेष्मकरं न च ।
शोफास्त्रपाण्डून् जयति न मेध्यं छर्दिकृत् परम् ।।587।।
(कै.नि.ओषधि वर्ग, 586-587)

# चांङ्गेरी (सं.व.)

चाङ्गेरी  दीपनी रुच्या रुक्षोष्णा कफवातनुत् ।
पित्तलाम्ला ग्रहण्यर्शः कुष्ठातीसारनाशिनी ।।24।।
(भा.प्र.शाकवर्ग 24)

चाङ्गेरी कफवातघ्नी ग्राहिण्युष्णा च पित्तकृत् ।
ग्रहण्यर्शोविकारघ्नी सामवाते कफे हिता ।।31।।
(ध.नि.आम्रादि वर्ग 31)

चाङ्गेर्यम्ला कषायोष्णा मधुरा दीपनी लघुः ।
पित्तला हन्त्यतीसार ग्रहण्यर्शःकफानिलान ।।698।।
(कै.दे.नि; ओ.वर्ग 698)

चाङगेरीशाकमत्युष्णं कटु रोचनपाचनम् ।
दीपनं कफवातार्शः संग्रहण्यतिसारजित् ।।
(रा.नि.)

## चिराबिल्व (फल)

श्रीफलस्तुवरस्तिक्ता ग्राही रुक्षोऽग्निपित्तकृत।
वातश्लेष्महरोबल्यो लघुरुष्णश्च पाचनः।।13।।

(भा.प्र., गुडुच्यादि वर्ग, 13,)

## दन्ती (मूल)

दन्ती तीक्ष्णोष्ण कटुका कफवातोदरान जयेत्।
अर्शो व्रणाश्मरीशूलान् हन्ति दीपनशोधनी।।224।।
(ध.नि.गुडूच्यादि प्रथमवर्ग 224)

दन्तीद्वयम् सरं पाके रसे च कटु दीपनम्।
गुदांकुराश्मशूलार्शः कण्डू कुष्ठ विदाहनुत्।।
तीक्ष्णोष्ण हन्ति पित्तास्रकफशोथोदर कृमीन्।
(भा.प्र.नि.गुडूच्यादिवर्ग)

तीक्ष्णोष्णान्याश्याशुकारीणि विकाशीनि गुरूणि च।
विलाययन्ति दोषौ द्वौ मारुतं कोपयन्ति च।।
(च.क. 12)

तयोर्मूलानि संग्राह्य स्थिराणि बहलानि च।
हस्तिदन्त प्रकाराणि श्यावताम्राणि बुद्धिमान्।।
पिप्पलीमधुलिप्तानि स्नेदयेत् मृत्कुशान्तरे।
शोषयेदातपेन्यकौ हतो ह्येषां विकाशिताम्।।
(च.क. 12)

दन्ती द्रवन्ती स्नेहास्तिक्तकटुकषायाः अधोभाग।
दोषहरा कृमि कुष्ठकफानिलहराः दुष्ट व्रण शोधनाश्च।।
(सु.सू. 45)

दन्ती कटूष्णा शूलाम् त्वग्दोषशमनी च सा।
अर्शो व्रणाश्मरी शल्य शोधनी दीपनी परा।।(160)
(रा.नि.पिप्पल्यादि वर्ग, 160)

दन्ती द्रवन्तिका चोष्णा कटु पाकरसा लघुः।
विकाषिणी सरा तीक्ष्णा दीपनी पाचनी हरेत्।।(1010)
कफपित्तोदरानाह शोफशूल गुदांकुरान्।
विदाहकण्डूकुष्ठास्रप्लीह गुल्माश्मरी कृमीन्।।(1011)
(कै.द.नि.औषधिवर्ग 1010-10)

## धत्तूर (बीज)

धत्तूरः कनको धूर्त्तो देवता कितवः शठः।
उन्मत्तको मदनकः कालिश्च हरवल्लभः।।6।।
धत्तूरः कटुरूष्णश्च कान्तिकारी व्रणार्तिनुत्।
कुष्ठानि हन्ति लेपेन प्रभावेण ज्वरं जयेत्।।7।।
त्वग्दोष कृच्छ्र कण्डूतिज्वरहारी भ्रमावहः।
(ध.नि.करवीरादिवर्गः 6-7)

धत्तूरः कितवोः धूर्त्त उन्मत्तः कनकाह्वयः।
शठो मातुलकः श्यामो मदनः शिवशेखरः।।17।।
खर्जूरघ्नः काहलापुष्पः खलः कण्टफलस्तथा।
मोहन कलमोन्मत्तः शैवः सप्तदशाह्वयः।।18।।
धत्तूरः कटुरूष्णश्च कान्तिकारी व्रणार्तिनुत्।
त्वग्दोषखर्जू ज्वरहारी भ्रमप्रदः ।।19।।
(रा.नि.करवीरादि वर्ग, 17-19)

धस्तुरो मदनो धूर्तो देवता कितवः शठः।।1545।।
उन्मत्तस्तरलस्तूरी धत्तूरः कनकाह्वयः।।
व्यालहा मातुलस्तस्य फलं मातुलपुत्रकः।।1546।।
धत्तूरो मधुरस्तिक्तस्तीक्ष्णोष्णस्तुवरो गुरूः।।
उन्मादावांतिमंदाग्निकांतिदो ज्वरकुष्ठनुत्।।1547।।
यूकालिक्षाव्रणश्लेष्मकृमिकण्डूविषापहा।
(कै.नि. ओषधि वर्ग;1545-1547)

धत्तूरधूर्त्तधत्तूरा उन्मत्तः कनकाह्वयः।
देवता किववस्तूरी महामोही शिवप्रियः।।85।।
मातुलो मदनश्चास्य फले मातुलपुत्रकः।
धत्तूरो मदवर्णाग्निवातकृज्जवरकुष्ठतुत्।।86।।
कषायो मधुरस्तिक्तो यूकालिक्षाविनाशकः।
उष्णो गुरुर्व्रणश्लेष्मकण्डूकृमिविषापहः।।87।।
(भा.प्र.गुडूच्यादिवर्गः 85-87)

## द्राक्षा (फल)

1. तृष्णा दाह ज्वर श्वास रक्तपित्त क्षत क्षयान्।
वातपित्त मुदावर्तं स्वरभेदं मदात्ययम्।।125।।
तिक्तास्य तामास्य शोषं कासं चाशुव्यपोहति ।
मृद्विका बृंहणी वृष्या मधुरा स्निग्धशीतला।।126।।
(च.सू.स्था.अ.27, 125-126)

2. द्राक्षा चारुफला कृष्णा प्रियाला तापसप्रिया।
काश्मीरिका विनिर्दिष्टा रसाला करमर्दिका।।49।।
द्राक्षा हृद्यरसा स्वर्या मधुरा स्निग्धशीतला।
रक्तपित्त ज्वर श्वास तृष्णा दाह क्षयापहा।।50।।
(धन नि. आम्रादि वर्ग 49-50)

3. द्राक्षा स्वादुफला प्रोक्ता तथा मधुरसाऽपि च।
मद्वीका हारहूरा गोस्तनी चापि कीर्तिता।।
द्राक्षा पक्वा रसा शीता चक्षुष्या बृंहणी गुरूः।
स्वादु पाक रसा स्पर्या तुवरा सृष्टमूत्रविद्।। 111।।
कोष्ठमारुतकृद् वृष्या कफपुष्टिरुचिप्रदा।
हन्ति तृष्णा ज्वर श्वास वात वातास्त्र कामला।।
कृच्छ्रास्रपित्त संमोह दाहशोषसमदात्ययान्।112।।
(भा.प्र.नि. आम्रादि फलवर्ग 111-112)

## दूर्वा (बीज)

दूर्वा शीता कषाया च रक्तपित्तकफापहा।

(ध.नि., चन्दनादि वर्ग)

दूर्वाः कषायाः मधुराश्च शीताः पित्ततृषारोचक वान्तिहन्त्र्यः।
सदाहमूर्च्छाग्रहभूतशान्ति श्लेष्म श्रमध्वंसनतृप्तिदाश्च।।117।।

(रा.नि., शाल्मल्यादि वर्ग,117)

दूर्वा स्वाद्वी हिमा तिक्ता कषाया जीवनी जयेत्।
कफपित्तास्त्र विसर्प तृषादाहत्वगामयान्।।1237।।

(कै.दे.नि;ओषधिवर्ग, 1237)

नीलदूर्वा हिमा तिक्ता मधुरा तुवरा हरेत्।
कफपित्तास्त्रवीसर्पतृष्णादाहत्वगामयान्।।173।।

(भा.प्र. गुडुच्यादि वर्ग 173 )

## एरण्ड (पत्र)

एरण्डपत्रं वातघ्नं कफक्रिमिविनाशनम्।
मूत्रकृच्छ्रहरं चापि पित्तरक्तप्रकोपणम्।
वातार्यग्रदलं गुल्मबस्तिशूलहरं परम्।।64।।
कफवातकृमीन्हन्ति वृद्धि सप्तविधामपि।
(भा.प्र.नि.,गुडूच्यादिवर्ग, 64)

एरण्डो मधुरो वृष्यो गुरुष्णो मार्गशोधनः।
कफपित्तानिलश्वासकासवर्ध्माश्मनाशनः।।115।।
गुल्मप्लीहोदरानाहकटीवस्तिशिरोरुजि।
मेहज्वरामवातास्रशूलशोफेषु शस्यते।।116।।
एरण्डपत्रं वातघ्नं कफक्रिमिविनाशनम्।
रक्तपित्तप्रकोपि स्यात् मूत्रदोषं जयेदपि।।117।।
गुल्मं च वस्तिशूलं च वृद्धि सप्तविधां तथा।
कफवातकृमिंश्चापि हन्यादेरण्डपल्लवम्।।118।।
(कै.दे.नि.ओषधिवर्ग 115-118)

एरण्डेऽपि रसे तिक्तः स्वादूष्णोऽनिलनाशनः।
उदावर्तप्लीहगुल्मवस्तिशूलान्त्र वृद्धिनुत्।।297।।
गुरुर्वातप्रशमनो विकाराञ्शोणिताज्जयेत्।
फलं स्वादु च सक्षारं लघूष्णं भेदि वातजित्।।298।।
(ध.नि., 297-298)

# एरण्ड (बीज)

एरण्डफलमत्युष्णं गुल्मशूलानिलापहम् ।।65।।
यकृत्पलीहोदराशोंघ्नि कटुकं दीपनं परम्।
तद्वन्मज्जा च विड्भेदी वातश्लेष्मोदरापहा।।66।।
(भा.प्र.नि. गुडुच्यादिवर्ग, 65-66)

निष्कुष्यैरण्डबीजानि पिष्ट्वा क्षीरं विपाचयेन्।
तत्पानं तु कटिशूले गृध्रस्यां परमौषधम्।।37।।
(भा.नि., म.ख.चि.8/137)

आमवातगजेन्द्रस्य शरीरवन चारिणः।
एक एव निहन्तायमेरण्ड स्नेहकेशरी।।50।।
(भा.प्र.म.ख.चि. 8/50)

एरण्डतैलं मधुरमुष्णं तीक्ष्णं कटु कषायानुरसं सूक्ष्मं स्रोतोविशोधनं त्वच्यं वृष्यं मधुरविपाकं वयः स्थापनं योनिशुक्र विशोधनमारोग्य मेधा कान्ति स्मृतिबलकरं वातकफहरमधोभाग दोषहरं च।।4।।
(सु.सू. स्थान 45/114)

## गंभारी (शाखा)

काश्मर्य. . . . . . विरेचनोपगानि भवन्ति।(च.सू.4/24)

काश्मर्य. . . . . . इति दशेमानि श्वयथुहराणि भवन्ति। (च.सू. 4/38)

गंभारी भद्रपर्णी च श्रीपर्णी मधुपर्णिका।
कृष्णवृन्ता मधुरसा महाकुसुमिकाऽपि च।
काश्मरी तुवरातिक्ता वीर्योष्णा मधुरा गुरुः।।
दीपनी पाचनी मेध्या भेदिनी भ्रमशोषजित्।
दोषतृष्णाऽऽमशूलार्शोविष दाहज्वरापहा।।
(भा.प्र. गुडूच्यादिवर्ग 14-16)

काश्मर्या काश्मरी हीरा काश्मर्यो मधुपर्ण्यपि।
श्रीपर्णी सर्वतोभद्रा गंभारी कृष्णवृन्तका।।
श्रीपर्णी स्वरसे तिक्ता गुरूष्णा रक्तपित्तजित्।
त्रिदोष श्रम दाहार्त्ति ज्वरं तृष्णाविषा जयेत्।।
(ध.नि.गुडूच्यादिवर्ग 114-115)

काश्मरी कटुका तिक्ता गुरूष्णा कफशोफनुत्।
त्रिदोष विषदाहार्त्ति ज्वर तृष्णास्रदोषजित।
(रा.नि.प्रभद्रादिवर्ग 38)

गंभारी कट्फला हीरा काश्मर्या मधुपर्णिका।
कृष्णवृन्ता भद्रपर्णी कुंभारी सफला मही।।
श्रीपर्णी मधुरा तिक्ता वीर्योष्णा तुवरा गुरूः।
दीपनी पाचनी मेध्या भेदनी भ्रमशोषजित्।।
दोषतृष्णामशूलार्शोविषदाहज्वरापहा
(कै.नि.ओषधिवर्ग 29-30)

काश्मरी ज्वर शूलघ्नी वीर्योष्णा मधुरा गुरूः।।
(म.नि.अभयादिवर्ग 51)

## गोजिह्वा (को. पत्र)

गोधूमिका  दर्विपत्री दर्विका कोष्ठशूलिका।
गोभी गोली च गोजिह्वा विज्ञेया भूमिकालिका।।733।।
गोजिह्वा तुवरा तिक्ता स्वादुपाकरसा: हिमा।
वातघ्ना ग्राहिणी हृद्या कफपित्तहरा लघु:।।734।।
हन्यात् कासारुचिश्वासप्रमेहास्त्रज्वरव्रणान्।

(कैयदेव नि., ओषधि वर्ग733-734)

## ग्रन्थिपर्णी (मूल)

ग्रन्थिपर्णं ग्रन्थिक च काकपुच्छ च ।
नीलपुष्पं सुगन्ध च कथितं तैलपर्णकम् ।
ग्रन्थिपर्णं तिक्ततीक्ष्णं कटूष्णं दीपनं लघु ।
कफवात विषश्वास कण्डू दौर्गन्ध्यनाशनम् ।।108।।

(भा.प्र., कर्पूरादि वर्ग108)

## हंसपदी (सं.व.)

हंसपादी हंसपदी कीटमाता त्रिपादिका ।
हंसपादी गुरू: शीता हन्ति रक्तविषव्रणान् ।
विसर्पदाहातीसारलूताभूताग्निरोहिणी: ।।256।।
(भा.प्र., गुडुच्यादि वर्ग 256)

रक्तपाद्यपरा प्रोक्ता विषग्रन्थिस्त्रिपाद्यपि ।
हंसपादी हंसपदी घृतमण्डलिका च सा ।।99।।
रक्तप्रसादनी शीता, दाहवीसर्पनाशिनी ।
व्रणप्ररोपणी हंसपदिका हंसपादिका ।।100।।
(धन्व. नि., करवीरादि वर्ग 99-100)

प्रह्लादनी विषग्रन्थिस्त्रिपादी त्रिपदी पदी ।
हंसपादी हंसपदी रक्तपादी मधुस्रवा ।।766।।
कीटनामा कीटमारी घृतमंडालसेलका ।
हंसपादी हिमा गुर्वी रोपणी हन्ति शोणितम् ।।767।।
दाहातीसारविसर्पलूताभूतविषव्रणान् ।
(कैयदेव नि., ओषधि वर्ग 766-767)

## हपुषा (फल)

हपुषा . . . . . . . . मत्स्यागन्धाप्लीहहन्त्री विषघ्नीध्वांक्षनाशिनी ।।
हपुषा दीपनी तिक्ता मृदूष्णा तुवरा गुरूः ।
पित्तोदरसमीरार्शो ग्रहणी गुल्मशूलहत् ।।100।।
(भा.प्र.नि., हरीत्क्यादि वर्ग, 100)

हपुषा कटु तिक्तोष्णा गुरूर्वातवलासजित् ।
अर्शांसि गुल्मशूलानि हन्ति जन्तूदरैः सह ।।10।।
(ध.निघण्टु, शतपुष्पादिवर्ग, 10)

## इन्द्रवारूणी (फल)

गवादनीयद्वयं तिक्तं पाके कटु सरं लघु।।204।।
वीर्योष्णं कामलापित्तकफप्लीहोदरापहम्।।205।।
श्वासकासापहं कुष्ठगुल्मग्रन्थिव्रणप्रणुत्।
प्रमेहमूढगर्भामगंडामयविषापहम्।।206।।
(भा.प्र.नि. गुडुच्यादिवर्ग, 204-206)

इन्द्रवारूणिकाऽत्युष्णा रेचनी कटुका तथा।
कृमिश्लेष्माव्रणान हन्ति हन्ति सर्वोदराण्यपि।।
(ध.नि. गुडुच्यादिवर्ग, 241)

## इन्द्रायन (कुट्ज बीज)

कुटजः कटुको रूक्षो दीपनस्तुवरो लघुः ।।54।।
अशोडिलिसारपित्तास्त्रकफतृष्णामपित्तनुत ।।
तत्पुष्पं शीतलं तिक्तं कषायं लघु दीपनम् ।
वातलं कफपित्तास्त्रकुष्ठातीसार जन्तुजित् ।
तस्य शिम्बिभवं शां भंजनं चामवातजित् ।
रूच्यं कफध्नं रक्तातिसारं कुष्ठ कृमीन् जयेत् ।।

(म.नि.)

कुटजः कटु-तिक्तोष्णः कषायश्चतिसारजित् ।
तत्रसितश्च पित्तध्नः त्वग्दोषार्शोनिकृन्तनः ।।54।।

(रा.नि. प्रभद्रादि वर्ग, 54)

कुटजः कटुकः तिक्तः कषायो रूक्षशीतलः ।
कुष्ठातिसारपित्तास्त्रगुदजानि विनाशयेत् ।।14।।

(ध.नि.शतपुष्पापदि वर्ग, 14)

कुटजः कटुको रूक्षो दीपनस्तुवरो हिमः ।
अर्शोऽतिसारापित्तास्त्रकफतृष्णाऽऽमकुष्ठनुत् ।।18।।

(भा.नि. गुडुच्यादि वर्ग, 118)

कफपित्तहरं पुष्पं कुष्ठध्नं कुटजस्य च ।।

(सुश्रुत सू. 46. 284)

## इन्द्रयव (बीज)

इन्द्रयवस्त्रिदोषघ्नः संग्राही शीतलः कटुः ।
ज्वरातिसाररक्तार्शः कृमिवीसर्पकुष्ठनुत् ।।

(म.नि.)

इन्द्रयवः कटुतिक्ताः शीतः कफवातपित्तहराः ।
दाहातिसारशमनाः नानात्वग्दोषशूलघ्नाः ।।57।।

(रा.नि. प्रभद्रादिवर्ग, 57)

शक्राह्वाः कटुतिक्तोष्णास्त्रिदोषघ्नश्च दीपनाः ।
रक्तार्शास्यितिसारं च घ्नन्ति शूलवमी स्तथा ।।16।।

(ध.नि. शतपुष्पादिवर्ग, 16)

## इश्वरी (मूल)

1. इश्वरी नामदमनी महायोगेश्वरी तथा।
महायोगेश्वरी तिक्ता कटुका हरते ब्रणान्।
रक्षोग्रहं विषं सर्प लूतागर्दभ लाजकान्।।
(कै.दे.नि.औषधिवर्ग780)

2. नाकुली तुवरा तिक्ता कटुकोष्णा नियच्छति।
भोगिलूता वृश्चिकारवुविषज्वरकृमिव्रणान्।।166।।
(भा.प्र.नि. हरीतक्यादि वर्ग, 166)

## जाती (पत्र)

जातीयुगं तिक्तमुष्णं तुवरं लघु दोषजित्।
शिरोऽक्षिमुखदन्तार्त्ति विषकुष्ठानिलास्रजित्।।28।।
(भा.प्र.नि. पुष्पवर्ग 28)

मालती तुवरा तिक्ता कटूष्णा दोषनाशिनी ।
शिरोऽक्षिमुखदन्तार्त्ति विषकुष्ठाव्रणास्रजित्।।1474।।
(कै.दे.नि. ओषधि वर्ग 1474)

## कदली (प्रकन्द)

1. कदली मधुरा शीता, रम्या पित्तहरा मृदु: ।
कदल्यास्तु फलं स्वादु कषायं नीति शीतलम् ।।69।।
रक्तपित्त हरं वृष्यं रुच्यं कफकरं गुरु।
कंदस्तु वातलोरुक्षः शीतोऽसृक्कृमिकुष्ठनुत् ।।70।।
(ध.नि. करवीरादिवर्ग 69-70)

2. शीतल:कदलीकन्दो बल्य: केश्योऽम्लपित्तजित्।
वह्निकृद्दाहहारी च मधुरो रुचिकारक: ।।105।।
(भा.प्र.शाकवर्ग 105)

3. बल्य:कदल्या:कन्द: स्यात् कफपित्तहरो गुरु।।283।।
वातलो रक्तशमन: कषायो रूक्ष शीतल: ।।
कर्ण शूलं रजोदोषं रोमरोगं नियच्छति।284।।
(कै.दे.नि.औषधि वर्ग 283-284)

कदली ............एषरोध्रादिको नाम मेद: कफहरोगण: ।
योनिदोषहर: स्तम्भी वर्ण्यो विषनाशन: ।।(27)
(अ.हृ.सू.स्था. 15, 27)

क्रिमिंहारि कन्दं ।।(38)
(रा.नि.आम्रादि वर्ग 38)

## काकजङ्घा (मूल)

काकजङ्घा नदीकान्ता काकतिक्ता सुलोमशा।
पारावतपदी दासी काका चापि प्रकीर्तिता ।।250।।
काकजंघा हिमा तिक्ता कषाया कफपित्तजित्।
निहन्ति ज्वरपित्तास्रव्रणकण्डूविषक्रिमीन्।।251।।
(भा.नि. पृष्ठ गुडुच्यादि वर्ग, 250-251)

काकजङ्घा च तिक्तोष्णा रक्तपित्तज्वरापहा।
कृमिदोषहरा वर्ण्या विषदोषहरामता ।।21।।
(ध.नि., करवीरादि वर्ग, 21, )

काकजंघा हिमा तिक्ता कषाया कफपित्ताजित्।।713।।
निहन्ति ज्वर कुष्ठास्त्रव्रणकण्डूविषकृमीन्।।
(कै.नि., ओषधिवर्ग, 713, )

## काकनासिका (बीज)

1. काकनासा तु मधुरा शिशिरा पित्तहारिणी।
रसायनी दार्ढ्यकरी विशेषात् पलितापहा।।(108)

(रा.नि.गुडूच्यादिवर्ग 108)

## काकोली (प्रकन्द)

काकोली मधुरा शुक्ला क्षीरा ध्वांक्षोलिकास्मृता ।
वयस्था स्वादुमांसी च वायसोली चे कर्णिका ।।128।।

काकोली स्वादुशीता च वातपित्तज्वरापहा ।
दाहघ्नी क्षयहन्त्री च श्लेष्म शुक्र विवर्धिनी ।।129।।
(ध.नि., गुडुच्यादि वर्ग,128-129)

काकोली युगलं वृष्यं मधुरं शीतलं गुरू ।।85।।
बृंहणं वातपित्तस्रदाहशोषज्वरापहम् ।।
(कै.नि., औषधि वर्ग, 85)

## कमल (कन्द)

1. पद्मोत्पलनलिन .................. इति दशेमानि मूत्र विरजनीयानि भवन्ति।

(च.सू. 4/34)

2. उत्पल रक्तोत्पल कुमुद सौगंधिक कुवलयपुण्डरीकाणि मधुकं चेति।

उत्पलादिरयं दाह पित्त रक्तविनशानः।
पिपासा विषहृद्रोगच्छर्दि मूर्छाहरो गणः।

(सु.सू.39/52-53)

3. मृणालं शीतलं वृष्यं पित्तदाहास्रजिद् गुरुः।
दुर्जरं स्वादुपाकं च स्तन्यानिल कफप्रदम।।
संग्राहि मधुरं रूक्षं शालूकमपि तदगुणम।
कमलं शीतलं वर्ण्यं मधुरं कफपित्तजित्।।
तृष्णा दाहास्र विस्फोट विष वीसर्प नाशनम्।

(भा.प्र. पुष्पवर्ग 3,6,7,13)

4. पद्ममूलं तु शालूकं सफलं करहाटकम्।
शालीनं पद्मकन्दं च जलालुकं निगद्यते।।
पद्मकन्दः कषायः स्यात् तिक्तः स्वादुर्विपाकतः।
शीतवीर्योऽस्रपित्तोत्थरोगभङ्गाय कल्पते।।

(ध.नि.करवीरादि वर्ग 144-145)

5. पद्मकन्दस्तु शालूकं पद्ममूलं कडाह्वयम्
शालीनं च जलालूकं स्यादित्येवं षडाह्वयम्।।
शालूकं कटु विष्टम्भि रुक्षं रुच्यं कफापहम्।
कषायं कासपित्तघ्नं तृष्णादाह निवारणम्।

(रा.नि.करवीरादि वर्ग 190-191)

## करवीर (मूल)

करवीर:श्वेत पुष्प: शतकुम्भोऽश्वमारक: ।
द्वितीयोरक्तपुष्पश्च चण्डातो लगुडस्तथा ।।82।।
करवीरद्वयं तिक्तं कषायं कटुक च तत् ।
व्रण लाघव कृन्नेत्र कोप कुष्ठ व्रणापहम् ।।83।।
वीर्योष्णं कृमिकण्डूघ्नं भक्षितं विषवन्मतम् ।।84।।
(भावप्रकाश निघण्टु, गुडुच्यादि वर्ग 82-84)

करवीर कटुस्तीक्ष्ण: कुष्ठकण्डूर्तिनाशन: ।
व्रणार्तिविष विस्फोट-शमनोऽश्र्वमृतिप्रद: ।।131।।
(रा.नि., करवीररादि वर्ग, 13)

करवीर: कटुस्तिक्तो वीर्ये चोष्णो ज्वरापह: ।
चक्षुष्य: कुष्ठकण्डूघ्न: प्रलेपाद्विषमन्यथा ।।
करवीरं द्वयं तिक्तं सविषं कुष्ठनित्कटु: ।।3।।
(ध.नि., करवीरादि वर्ग, 3)

## करमर्दक (मूल)

1. करमर्दः सुषेणः स्यात्कृष्णपाकफलस्तथा।
तस्माल्लघुफला या तु सा ज्ञेया करमर्दिका।।
करमर्दद्वयं त्वामम्लं गुरू तृषाहरम्।
उष्णं रूचिकरं प्रोक्तं रक्तपित्तकफप्रदम्।।
तत्पक्वं मधुरं रुच्यं लघु पित्तसमीरजित्।।
(भा.प्र.नि. आम्रादिफलवर्ग 81-82)

2. करमर्दकमाविग्नं सुषेण पाणिमर्दकम्।
कराम्लं करमर्द च कृष्णपाकफलं मतम्।।
अम्लं तृष्णापहं रूच्यं पित्त कृत्करमर्दकम्।
पक्वं च मधुरं शीतं रक्तपित्तहरं मतम्।।
(ध.नि.आम्रादिवर्ग 92-93)

3. करमर्दः सुषेणश्च कराम्लः करमर्दकः।
करमर्दः सतिक्ताम्लो बालो दीपनदाहकः।।
पक्वस्त्रि दोषशमनोऽरूचिघ्नो विषनाशनः।
(राजनिघण्टु आम्रादिवर्ग 207-20)

## काश (मूल)

1. वीरण...... दर्भकुशकाश...... इति दशेमेमानि स्तन्य जननानि भवन्ति।

(च.सू.अ. 4/17)

2. कुशकाश नल दर्भ काण्डेक्षुका इति तृणसंज्ञकः।
मूत्रदोष विकार च रक्तपित्तं तथैव च।
अन्त्यः प्रयुक्तः क्षीरेण शीघ्रमेव विनाशयेत्।।

(सु.सू.अ.39/76-77)

3. कासः कासेक्षुरूदिष्टः सस्यादिक्षुरस्तथा।
इक्ष्वालिकेक्षुगन्धा च तथा पोटगलः स्मृतः।।
कासः स्यान्मुधुरस्तिक्तः स्वादुपाको हिमः सरः।
मूत्रकृच्छ्राश्म दाहास्रक्षयपित्तज रोगजित्।।

(भा.प्र.गुडूच्यादि वर्ग 161-162)

4. काशः स्वादु रसे तिक्तो विपाके वीर्यतो हिमः ।
तर्पणो बलकृद्वृष्यः श्रमशोष क्षयापहः ।।
काशद्वयं च पित्तास्रकृच्छ्रजिन्मधुरं हिमम्।।

(धन्व. नि.,करवीरादि वर्ग 115-116)

5. काशश्च शिशिरो गौल्यो रूचिकृत पित्तदाहनुत्।
तर्पणो बलकृदावृष्य आमशोषक्षयापहः।।

(रा.नि.शाल्मल्यादि वर्ग 89)

6. काशः सुकाण्डः काशेक्षुर्रुषीकः श्वेतवासरः।
इक्ष्वारिकेक्षुकाशश्च स चैवेक्षुरसः स्मृतः।
कास कृच्छ्राश्मदाहास्र पित्तक्षयकरो हिमः।।

(म.नि.अभयादि वर्ग 37)

## कट्फल (शा.त्वक्.)

कट्फलः कफवातघ्नो गुल्ममेहाग्निमान्द्यजित्।
रूचिष्यो ज्वर-दुर्नाम-ग्रहणी-पाण्डुरोगहा।।74।।

(ध.नि.,गुडुच्यादि वर्ग, 74)

कट्फलः कटुरूष्णश्च कासश्वासज्वरापहः।
उग्रदाहहरो रुच्यो मुखरोगशमप्रदः।।21।।

(रा.नि., प्रभद्रादि वर्ग, 21)

कट्फलस्तुवरस्तिक्तः कटुर्वातकफज्वरान्।
हन्ति श्वासप्रमेहार्शः कासकण्ठामयारुचीः।।181।।

(भा.प्र.नि.हरीतक्यादि वर्ग, 181)

कट्फलं कफरोगघ्नं श्वासकासज्वरापहम्।

(राजवल्लभः)

## कटफल (शा.त्वक्.)

1. मधुक मधुपर्णीपृश्निपर्ण्यम्बष्ठकी - - - - कट्फलानीति । दशेमानि सन्धानीयानि भवन्ति।।5।।

2. सारिवेक्षु - - - कैटर्य- - - कट्टकारिका इति दशेमानि कण्ठयानि भवन्ति।।9।।

3. कुष्ठैलवालुक कटफल - - - उशीरापीति शुक्रशोधनानि भवन्ति।।20।।

4. शाल कटफल - - - - - - अशोक इति दशेमानि वेदना स्थापनानि भवन्ति।।47।।

(च.सू. 5,9,20,47)

5. कट्फलः सोमवल्कश्च कैटर्य्यः कुम्भिकाऽपि च।
कट्फलस्तुवरस्तिका कटुर्वात कफज्वरान्।।
हन्ति श्वासप्रमेहार्शः कासकण्ठामयारुचीः।।81।।

(भा.नि., हरीतक्यादिवर्ग 181)

6. कट्फलः कफवातघ्नो गुल्ममेहाग्निमान्द्यजित्।
रुचिष्यो ज्वरदुर्नाम ग्रहणीपाण्डुरोगहा।।74।।

(ध.नि. गुडूच्यादिवर्ग, 74)

7. कट्फलः कटुरुष्णश्च कासश्वासज्वरापहः।
उग्रदाहहरो रुच्यो मुखरोगनाशमप्रदः।।21।।

(रा.नि., प्रभद्रादिवर्ग 21)

8. कट्फलं कटुकं तिक्तं कषायं कफवातनुत्।
निहन्ति मेह गुल्मार्शः श्वासकासारुचिज्वरान्।।113।।

(कै.नि., ओषधिवर्ग 113)

9. कट्फलं तुवरं तिक्तं कटु वातकफज्वरान्।
हन्ति श्वासप्रमेहार्शः कासकण्ठामयारुचिः।।

(म.नि. 3)

## कोल (फल मज्जा)

बदरं मधुरं कषायमम्लं परिपक्वं मधुराम्लमुष्णमेतत् ।
कफकृत्पचनातिसाररक्तश्रमशोषार्ति विनाशनं च रुच्यम ।।
(रा.नि.आम्रादि वर्ग - 138.)

भूबदरी मधुराम्ला कफवात विकारहारिणी पथ्या ।
दीपन पाचनकर्त्री किं चतत्पित्तासुकारिणी रुच्या।
(रा.नि., आम्रादि वर्ग. 143.)

सौवीरं लघु सपक्वं मधुरं कोल मुच्यते ।।74।।
कोलन्तु बदरं ग्राहि रुच्यमुष्णन्च वातहत् ।।
(भा.प्र.नि.आम्रादि वर्ग; 74-1/2)

## कोल (शा.त्वक्)

पुंसि स्त्रिया च कर्कन्धूर्बदरी कोलमित्यपि ।।71।।
फेनिलं कुवलं घोण्टा सौवीरं बदरं महत् ।
अजप्रिया कुहा कोली विषमोभयकण्टका ।।72।।
पच्यमानं सुमधरं सौवीरं बदरं महत् ।
सौवीरं बदरं शीतं भेदनंगुरूशुक्रलम् ।।73।।
वृहणं पित्तदाहास्रक्षयतृष्णानिवारणम् ।
सौवीरं लघु सम्पक्वं मधुरं कोलमुच्यते ।।74।।
कोलन्तुः बदरं ग्राहि रुच्यमुष्ण च वातहत्।
कफपित्तकरं चापि गुरू सारकमीरितम्।।75।।
कर्कन्धेः क्षुद्रबदरं कथितं पूर्वसूरिभिः ।
अम्लं स्याक्षुद्रबदरं कषायं मधुरं मनाक्।।76।।
स्निग्धं गुरू च तिक्त च वातपित्तापहं स्मृतम् ।
शुष्कं भेद्यग्निकृबत्सर्वं लघु तृष्णावलमास्रजित् ।।77।।

(भा.प्र.नि.,फलवर्ग;71-77)

## कोषातकी (सं.व.)

क्ष्वेडस्तिक: कटुस्तीक्ष्णोऽग्रगाढश्च प्रशस्यते।
कुष्ठपाण्ड्वामयप्लीहशोफगुल्मगरादिषु।।191।।

(ध.नि.गुडुच्यादि वर्ग,191)

कोशातकी तु शिशिरा कटुकाऽल्पकषायका।
पित्तवातकफघ्नी च मलाध्मानविशोधिनी।।49।।

(रा.नि.गुडुच्यादि वर्ग 49)

"राजकोषातकी" गरे गुल्मोदरे कासे वातश्लेष्मामये स्थिते।
कफे च कण्टवकास्थे कफसंचयजेषु च।

(चरक क.अ. 4)

कोषातकी कफार्शोघ्नी पक्वामाशयशोधिनी।।(राजवल्लभ)

## कुमुद (पुष्प)

कुमुदं पिच्छिलं स्निग्धं मधुरं ह्लादि शीतलम्।।15।।

(भा.प्र.नि., पुष्प वर्ग 15)

उत्पल कुमुद पद्म किञ्जल्कः सांग्राहिकरक्तपिततप्रशमनानम्।।39।।

(च.सू. 25;39)

कुमुदोत्पलनालास्तु सपुष्पाः सपेफलाः स्मृताः।।117।।
शीताः स्वादुकषायास्तु कफमारुतकोपनाः।

( च.सू.स्थान.27;117)

मधुरं पिच्छिलं स्निग्धं कुमुदं ह्लादि शीतलम्।।

(सु.सू.46;285)

कुमुदं शीतलं स्वादुपाके तिक्तकफापहम।
रक्त दोषहरं दाहश्रमपित्त प्रशान्तिकृत।।137।।

(ध.नि. करवीरादि वर्ग,137)

## कुश (मूल)

1. दर्भद्वयं त्रिदोषघ्नं मधुरं तुवरं हिमम्।
मूत्रकृच्छ्राश्मरीतृष्णाबस्तिरूक्प्रदरास्रजित्।।
(भा.प्र., गुडुच्यादि वर्ग 166)

2. दर्भ युग्मं पवित्रं स्यान्मूत्रकृच्छ्रघ्नशीतलम्।
रक्तपित्त प्रशमनं केवलं पित्तनाशनम्।।(119)
(धन्व: नि. करवीरादि वर्ग119)

## लांड्गली (प्रकन्द)

कलिहारी तु हलिनी लांड्गली शक्रपुष्प्यापी।
विशल्याघ्नि शिखाऽनन्ता वह्निवक्त्रा च गर्भनुत।।
कलिहारी सरा कुष्ठ्शोफार्शोव्रणशूलजित्।।80।।
सक्षारा श्लेष्मजितिक्ता कटुका तुवराऽपिच।
तीक्ष्णोष्णा क्रिमहल्लघ्वी पित्तला गर्भपातिनी ।।81।।
(भा.नि. गुडुच्यादि वर्ग, 81)

लांगली कटुरूष्णा च कफवातविनाशनी।
तिक्ता सराच श्वयभुगर्भशल्यव्रणापहा।।9।।
(ध.नि.,करवीरादि वर्ग, 9)

## लशुन (कन्द)

1. कृमि कृष्ठकिलासघ्नो वातघ्नो गुल्मनाशनः।
स्निग्धश्चोष्णश्च वृष्यश्च लशुनः कटुको गुरुः।।
(च.सू.27/76)

2. शिरोविदेचनद्रव्याणि पुनरापामार्ग ...... लशुन... च।
(च.वि.8/151)

3. लशुनो भृशस्तीक्ष्णोष्णः कटुपाकरसः सरः।
हृद्यः केश्यो गुरूः वृष्यः स्निग्धोरोचनदीपनः।।
भग्नसन्धानकृद्बल्यो रक्तपित्त प्रदूषणः।
किलासकुष्ठ गुल्मार्शो मेहकृमि कफानिलान्।
सहिध्ममापीनसश्वासकासान् हन्ति रसायनम्।
(अ.हृ.6/109-111)

4. लशुनस्तु रसोनः स्यादुग्रगन्धो महौषधम्।।217।।
कटुकश्चापि मूलेषु तिक्तः पत्रेषु संस्थितः।।220।।
रसोनो बृंहणो वृष्यः स्निग्धोष्णः पाचनः सरः।
रसे पाके च कटुकः तीक्ष्णो मधुरको मतः ।।221।।
भग्नसन्धानकृत्कण्ठयो गुरूः पित्तास्रवृद्धिदः।
बलवर्णकरो मेधाहितो नेत्र्यो रसायनः।।222।।
ह्वद्रोगजीर्णज्वर कुक्षिशूल-विबन्धगुल्मारूचिकासशोफान।
दुर्नामकुष्ठानलसादजन्तु समीरणश्वासकफांश्च हन्ति।।223।।
(भा.प्र.हरीतक्यादिवर्ग 217, 220-223)

5. रसोन उष्णः कटुपिच्छिलश्च स्निग्धो गुरूः स्वादुरसोऽतिबल्यः।
वृष्यश्च मेधास्वरवर्णचक्षुर्भग्नास्थिसंधानकरः सुतीक्ष्ण।।
(ध.नि.करवीरादि वर्गः, 61-62)

6. रसोनोऽम्लरसोनः स्यात गुरूष्णः कफवातनुत्।
अरूचिक्रिमि हवद्रोग-शोफघ्नश्च रसायन।
(रा.नि.मूलकादिवर्ग 50)

**महाबला (मूल)**

महाबला पीतपुष्पा सहदेवी च सा स्मृता ।
हरेन्महाबला कृच्छ्म भवेद्वातानुलोमनी ।।
बलाचतुष्टयं शीतं मधुरं बलकान्तिकृत् ।
स्निग्धं ग्राहि समीरास्रपित्तास्रक्षतनाशनम् ।।
(भा.प्र. गुडुच्यादिवर्ग 142-146)

महाबला वाट्यपुष्पी तथा वाट्यायनी स्मृता ।
सहदेवा देवसहा पीतपुष्पा बृहत्फला ।।
महाबला तु हृद्रोगवातार्शः शोफनाशिनी ।
शुक्रवृद्धिकरी हन्याद् विषमं च ज्वरं नृणाम् ।।
(ध.नि. गुडूच्यादिवर्ग 272-273)

महाबला तु हृद्रोग वातार्शः शोफनाशनी ।
शुक्रवृद्धिकरी बल्या विषमज्वरहारिणी ।।
(रा.नि.शताहादिवर्ग 100)

वाट्यायनी वीरपुष्पी वाट्या वीर्या बृहद्बला ।
महाबलास ऋष्यप्रोक्ता भारद्वाजी सुकर्णिका ।।
ऋष्यपुष्पी पीतपुष्पी ज्ञऋष्यगन्धा महासहा ।
बला चतुष्टयं स्निग्धं मधुरं रसपाकयोः ।
शीतलं ग्राहि धात्योजोबलायुः कान्तिवर्धनम् ।।
हन्ति वातास्रपित्तास्रदोषत्रयक्षतक्षयान् ।।
(कै.नि.ओषधिवर्ग 1053-1057 )

महाबला वीरपुष्पी सहदेवी सहदेवी बृहद्बला ।
वाट्यायनी देवसहा वाट्या स्यात्पीतपुष्पिका ।।
बला चतुष्टयं शीतं मधुरं बलकान्तिकृत् ।।
स्निग्धं ग्राहि समीरास्रपित्तास्रक्षतनाशनम् ।
आसां बृहद्बला कृच्छ्रं हन्ति वातानुलोमनी ।।
(म.नि.अभयादिवर्ग; 83,86,87.)

## मंजिष्ठ (शाखा)

1. मञ्जिष्ठा मधुरा तिक्ता कषाया स्वरवर्णकृत्
गुरूरूष्णा विषश्लेष्मशोथ योन्यक्षिककर्णक
रक्तातीसार कुष्ठास्त्रवीसर्पव्रणमेहनुत् ।(191)
(भा.प्र.नि. हरीतक्यादि वर्ग191)

2. मञ्जिष्ठातुवरा तिक्ता स्वर्योष्णा मधुरा गुरू:
कर्णाक्षियोनिरोगघ्नी कफशोफविषापहा ।(1426)
विसर्पमेहकुष्ठार्शोव्रणरक्तातिसारजित्
शाकं स्वादु लघु स्निग्धं दीपनं वातपित्तजित् ।(1427)
(कै.दे.नि.ओषधिवर्ग 1426-1427)

3. मञ्जिष्ठा मधुरा स्वादे कषायोष्णा गुरूस्तथा
कफोग्रव्रणमेहास्त्र विष नेत्रामयाञ्जयेत् । (19)
(ध.नि.गुडूच्यादिवर्ग 19)

## मरिच (फल)

1. नात्यर्थ उष्णम् मरिचमवृष्यं लघु रोचनम्।
छेदित्वात्शोषणत्वाच्च दीपनं कफवातजित्।।298।।
(च.सू. 298)

2. मरिचं कटुतिक्तोष्णं पित्तकृच्छ्रश्लेष्मनाशनम्
वायु निवारयत्येव जन्तुसन्ताननाशनम्।(86)
(धन्व:नि. शतपुष्पादिवर्ग 86)

3. मरिचं वेल्लजं कृष्णमूषणं धर्मपत्तनम्
मरिचं कटुकं तीक्ष्णं दीपनं कफवातजित्।
उष्णं पित्तकरं रूक्षं श्वासशूलं कृमीन्हरेत्। (60)
(भा.प्र.हरीतक्यादि वर्ग 59-60)

4. मरिचं कटु तिक्तोष्णं लघुश्लेष्मविनाशनम्
समीर कृमिहृद्रोग-हरञ्च रूचिकारकम्। (32)
(रा.नि. पिप्पल्यादि वर्ग 32)

## माषपर्णी (सं.व.)

1. माषपर्णी हिमा तिक्ता रूक्षा शुक्रबलासकृत
मधुरा ग्राहिणी शोथवातपित्तज्वरास्त्रजित् ।(56)
(भा.नि.,गुडुच्यादि वर्ग, 56)

2. माषपर्णी हिमा रूक्षा मधुरा: कफशुक्रला
तिक्ता संग्राहिणी वातपित्तदाहज्वरास्त्रजित् ।।106।।
(कै.दे.नि. ओषधि वर्ग, 106)

3. माषपर्णी रसे तिक्ता शीतला रक्तपित्तजित् ।।133।।
(ध.नि. गुडुच्यादि वर्ग,133)

## मसूर (बीज)

मङ्गल्यको मसूरः स्यान्ममङ्गल्या च मसूरिका।
मसूरो मधुरः पाके संग्राही शीतलो लघुः।।
कफपित्तास्रजिद्रूक्षो वातलो ज्वरनाशनः ।।50।।
(भा.प्र.नि., धान्यवर्ग, 50)

मसूराः मधुरा सूप्या पृथवः पित्तभेषजम्।
मसूरो मधुरः शीतः संग्राही कफपित्तहा।
वातामयकरश्चैव मूत्रकृच्छ्रहरो लघुः।।84।।
(ध.नि. सुवर्णादिवर्ग, 84)

मसूरिका मसूराव्या मंगल्या पाण्डुरा तथा।
मसूरा मधुराः पाके कषाया मधुरा हिमाः।।71।।
लघवो ग्राहिणो रुक्षा रक्तपित्तकफापहा
वर्ण्या वातोल्वणा बल्यास्तेषा शाकं सतिक्तकम्।।72।।
ऋते मुद्गमसूराभ्यामन्ये त्वाध्मानकारकाः।
(कै.दे.नि., धान्यवर्ग, 71-72)

## मुद्ग (बीज)

1. वरोत्र मुद्गोऽल्पचलः . . . . . . (अ.हृ.सू. 6/18)

2. अत्र एषु च शिम्बीधान्येषु मध्ये मुद्गउत्तमः।
(अरुणदत्त टीका)

3. मुद्गो रुक्षो लघुर्ग्राही कफपित्तहरो हिमः।
स्वादुरल्पानिलो नेत्र्यो ज्वरघ्नो वनजस्तथा।
मुद्गो बहुविधः श्यामो हरितः पीकस्तथा
श्वेतो रक्तश्च तेषान्तु पूर्वः पूर्वोलघुः स्मृतः।
(भा.प्र.धान्यवर्गः 38-39)

4. मुद्गः किलाटो मांगल्यो हरितः शारदोऽपि च
पित्तप्रेसेको वसुको माधवः प्रवरोऽसितः
मुद्गो रूक्षो लघुर्ग्राही कफपित्तहरो हिमः
स्वादुरल्पानिलो नेत्र्यो वन्योऽप्येतद्गुणः स्मृतः।
हरितः प्रवरस्तेषां तच्छाकं तिक्तमुत्तमम्
कृष्णमुद्ग वरको राजमुद्गस्तु खण्डकः।
(ध.नि.सुवर्णादिवर्गः 70-72)

5. मुद्गो रूक्षो लघुर्ग्राही कफपित्तहरोहिमः।
(मदनपाल नि., 32)

6. मुद्गोऽत्र प्रवरो रूक्षः कषायो मधुरो हिमः
कफपित्तहरो ग्राही लघुहष्टिप्रसादनः।
अल्पानिलोऽत्र हरितो वर्ण्यः पुष्ठिबलप्रदः
वन्यो मुद्गः समस्तेषां शाकं श्रेष्ठं सतिक्तकम्।
(कै.दे.नि. धान्यवर्ग, 52-53)

## मूलक (बीज)

विशुष्कं तु मूलकं कफवातजित्।
(चरक सू.स्थान.अ. 27/168)

त्रिदोषशमनं शुष्कं विषदोषहरं लघु।
(ध. नि. करवीरादिवर्ग 31)

वातश्लेष्महरं शुष्कं सर्वमामं तु दोषलम्।
(अ. हृदय सू. 6/104)

मूलकं तीक्ष्णमुष्णच कटूष्णं ग्राहि दीपनम्।
दुर्नाम गुल्म हृद्रोग वातघ्नं रूचिदं गुरू।।
(रा. नि., मुलरादिवर्ग 10)

कटुतिक्तरसा हृद्या रोचनी वह्नि दीपनी।
सर्वदोषहरा लघ्वी कण्ठ्या मूलकपोतिका।।
(सु. सं. सू. 46/240)

शुष्कं लघु हरेच्छोफं विषं दोषत्रयं तथा।
तत्पुष्पं कफपित्तघ्नं फलं तु कफवातजित्।।
(के. नि. ओषधिवर्ग 673)

## मुण्डीतिका (पत्र)

मुण्डीतिका कटुः पाके वीर्योष्णा मधुरालघुः ।
मेध्या गंडापची कुष्ठ कृमियोन्यर्तिपाण्डुनुत् ।।217।।
श्लीपदारुच्यपस्मार प्लीहमेदोगुदार्त्तिहत ।।
महामुण्डी च तत्तुल्या गुणैरुक्ता महर्षिभिः ।।218।।
(भा.प्र.नि. गुडूच्यादि वर्ग 217-218)

मुण्डिका कटुतिक्ता स्याद् अनिलास्त्रविनाशिनी ।
आमारुचिहन्यपस्मारगण्डश्लीपदनाशिनी ।।157।।
(ध.नि. गुडुच्यादि वर्ग, 157)

श्रवणीमधुरा तिक्ता कटुपाका कटुर्लघुः ।।989।।
वीर्योष्णा तुवरा मेध्या स्थिरा वातकफापहा ।
जयेत् गण्डापचीप्लीहमेदोऽपस्मार पाण्डुताः ।।990।।
श्लीपदारुचियोन्यर्तिकासकृच्छ्र गुदकृमीन ।
(कैयदेव निघण्टु, औषधिवर्ग, 989-990)

श्रावणी तु कषाया स्यात् कटूष्णा कफपित्तनुत् ।
आमातीसार कासघ्नी विषच्छर्दि विनाशिनी ।।18।।
महामुण्डयुष्णतिक्ता च ईषद् गौल्या मरूच्छिदा ।
स्वर कृद्रोचनी चैव मेहकृच्च रसायनी ।।21।।
(रा.नि., पर्पटादिवर्ग, 18, 21)

## मुस्ता (कन्द)

मुस्तकं न स्त्रियां मुस्तं त्रिपु वारिदनामकम् ।
कुरूविन्दश्च संख्यातोऽपरःक्रोडकसेरूकः ।।92।।
भद्रमुस्त च गुन्द्रा च तथा नागरमुस्तकः ।
मुस्तं कटु हिमं ग्राहि तिक्तं दीपनपाचनम् ।।93।।
कषायं कफपित्तास्रतृड्ज्वरारुफचिजन्तुहृत् ।
अनूपदेशे यज्जातं मुस्तकं तत्प्रशस्यते ।
तत्रापि मुनिभिःप्रोक्तं वरं नागरमुस्तकम् ।।94।।

(भा.प्र.कर्पूरादि वर्ग, 92-94)

मुस्ता चाम्बुधरो मेधो घनो राजकसेरूकः ।
भद्रमुस्तो वराहोऽब्दो गाङ्गेयः कुरूविन्दकः ।।39।।
जीमूतोऽतोथ वृषध्वाड्.क्षी जलदोऽथं जलावहः ।।
नादेयः पिण्डमुस्तोऽन्यो नागरः परिकीर्तितः ।।40।।
मुस्ता तिक्तकषायाऽतिशिशिरा श्लेष्मरक्तजित् ।
पित्तज्वरातिसारघ्नी तृष्णाकृमिविनाशिनी ।।41।।

(ध.नि., गुडुच्यादि वर्ग, 39-41)

मुस्तोऽम्भोदो घनं मुस्तं गाङ्गेयी कुरूविन्दुकः ।
भद्रमुस्तो वराहादः पिठरं पिण्डमुस्तकम् ।।1357।।
पूर्णकोष्ठो भद्रहंसो प्राच्यो राजकसेरूकः ।
मुस्तं तिक्तं हिमं ग्राहि दीपनं पाचनं कटु ।।1358।।
कषायं कफपित्तास्रतृड्ज्वरारूचिजन्तुर्जित् ।

(कैयदेव नि., ओषधि वर्ग,1357-1358)

## नागवल्ली (पत्र)

ताम्बूलवल्ली ताम्बूली भागिनी नागवल्लरी ।
ताम्बूलं विशदं तीक्ष्णोष्णं तुवरं सरम् ।।11।।
वश्यं तिक्तं कटु क्षारं रक्तपित्तकरं लघु ।
बल्यं श्लेष्मास्यदौर्गन्ध्यमल वातश्रमापहम् ।।12।।
(भा.प्र., गुडुच्यादि वर्ग 11-12)

ताम्बूलवल्ली ताम्बूली नागवल्ली च नागिनी ।।511।।
ताम्बूलवल्लिकापत्रं तिक्तं पाकरसोषणम् ।
तीक्ष्णोष्णं तुवरं क्षारं दीपनं विशदं सरम् ।।512।।
रोचनं स्रंसनं स्वर्यं रक्तपित्तविवर्धनम् ।
कफवातास्यदौर्गन्ध्यकण्डूक्लेदमलापहम् ।।513।।
(कैयदेव नि., ओषधि वर्ग,511-513)

## नारिकेल (फल मज्जा)

-----------नारिकेलफलानि च ।
बृंहणस्निग्धशीतानि बल्यानि मधुराणि च ॥(च.सू.27/130)

नालिकेर -------- मधुराणि मधुरविपाकानि
वातपित्तप्रशमनानि शीतवीर्याणि - अभिष्यन्दीनि
सृष्टमूत्राण्यग्निसादनानि चेति । (सु.सू.45/120)

नालिकेरं गुरू स्निग्धं पित्तघ्नं स्वादुशीतलम् ।
बलमांसप्रदं हृद्यं बृंहणं बस्तिशोधनम् ।। (सु.सू. 46/180)

------ नारिकेल ----- । ------ बृंहणं गुरू शीतलम् ।
दाहक्षतक्षयहरं रक्तपित्तप्रसादनम्।
स्वादुपाकरसं स्निग्धं बिष्टम्भिकफशुक्रकृत।। (अ. हृ. सू. 6/119-121)

नारिकेलफलं शीतं दुर्जरं बस्तिशोधनम् ।
विष्टम्भि बृंहणं बल्यं वातपित्तास्रदाहनुत् ।। 39।।
(भा. नि.,आम्रादिवर्ग, 39)

नारिकेलं गुरू स्निग्धं पित्तकृत् स्वादु शीतलम् ।
बलमांसप्रदं वृष्यं बृंहणं बस्तिशोधनम् ।। 68।।
(ध.नि., आम्रादिवर्ग, 68)

नालिकेरं हिमं स्निग्धं स्वादुपाकरसं गुरू ।
तर्पणं पाचनं वृष्यं बृहणं बलमांसकृत् ।।268।।
विष्टम्भि दुर्जरं हृद्यं श्लेष्मलं बस्तिशोधनम् ।
दाहक्षतक्षयहरं वातपित्तास्रनाशनम् ।।269।।
(कै.नि.ओषधिवर्ग268-269)

नारिकेलो गुरूः स्निग्धः शीतः पित्तविनाशनः ।
अर्द्धपक्वस्तृषा-शोष शमनो दुर्जरः परः।। 41।।
(रा.नि., आम्रादिवर्ग, 41)

नारिकेल फलं शीतं दुर्जरं वस्तिशोधनम् ।
विष्टम्भि बृंहणं-वृष्यं वातपित्तास्रदाहजित् ।।15।।
(म.नि.,फलादिवर्ग, 15)

## निचुल (फल)

1. इज्जलो हिज्जलश्चापि निचुलश्चाम्बुजस्तथा।
जलवेतसवद्वेद्यो हिज्जलोऽलं विषापहः।(138)
(भा.प्र.नि. गुडूच्यादिवर्ग, 138)

2. हिज्जलः कटूष्णश्च पवित्रोभूतनाशनः
वातामयहरोनानाग्रहसंचार दोषजित्।।155।।
(रा.नि., शाल्मल्यादि वर्ग, 155)

3. ....... निचुलानि च पक्वाशयगते दोष विरेकार्थ प्रयोजयेत्।
(च.सू. 2/10)

4. हिज्जलः कफवातघ्नो रेचनो वामकस्या।
(सु.सू. 39)

## नीली (सं.व.)

1. नीली तु नीलिनी तूणी काला दोला च नीलिका
नीलिनी रेचनो तिक्ता केश्या मोहभ्रमापहा।
उष्णा हन्त्युदरप्लीहवातरक्त कफानिलान्
आमवात मुदावर्त मदं च विषमुद्धम।(207)
(भा.प्र. गुडूच्यादिवर्ग, 207)

2. नीलिनी नीलिका काला ग्राम्या दोला विशोधनी
तुस्या श्रीफलिका मोचा भारवाही च रञ्जनी।
नीली तिक्ता रसे चोष्णा कटिवात कफापहा
केश्या विषोदरं हन्ति वातासृक्कृमिनाशिनी।(227-228)
(ध.नि.गुडच्यादिवर्ग, 227-228)

3. नीली तु कटुतिक्तोष्णा केश्या कासकफामनुत्
मरूद्विषोदरव्याधि-गुल्मजन्तुज्वरापहा।(83)
(राज नि. शताह्वादिवर्ग, 83)

4. नीली तिक्ता रसे पाके सरोष्णा भ्रममोहकृत्
कफानिलहराकेश्या प्लीहोदर विषापहा।
वातरक्तमुदावर्त्तमामवातगदं हरेत्।(792)
(कै.दे.नि.ओषधिवर्ग, 792)

5. नीलिनी रेचनी तिक्ता केश्या मोहभ्रमापहा
उष्णा हन्त्युदरप्लीहवातपित्तकफानिलान्।(29)
(म.नि.अभयादिवर्ग, 29)

## निर्गुण्डी (पत्र)

1. सिन्दुवारः श्वेतपुष्पः सिन्दुकः सिन्दुवारकः
   नीलपुष्पी तु निर्गुण्डी शेफाली सुबहा च सा ।।113।।

2. सिन्दुकः स्मृतिदस्तिक्तः कषायः कटुको लघुः ।।114।।
   सिन्दुरवारदलं जन्तुवातश्लेष्महरं लघु ।।115।।
   (भा.नि., गुडुच्यादि वर्ग, 113-115)

3. निर्गुण्डी कटुतिक्तोष्णा कृमिकुष्ठरूजापहा
   वातश्लेष्मप्रशमनी प्लीहगुल्मारूचीर्जयेत् ।।74।।
   (ध.नि., करवीरादि वर्ग, 74)

## पद्मक (का.म.)

पद्मकं पद्मगन्धि स्यात्तथा पद्माह्वयं स्मृतम्।
पद्मकं तुवरं तिक्तं शीतलं वातलं लघु।।30।।
वीसर्पदाहविस्फोटकुष्ठश्लेष्मास्रपित्तनुत्।
गर्भसंस्थापनं रुच्यं वमिव्रणतृषाप्रणुत्।।31।।
(भा.नि., कर्पूरादि वर्ग, 30-31)

पद्मकं शिशिरं स्निग्धं कषायं रक्तपित्तनुत्।
गर्भस्थैर्यकरं प्रोक्तं ज्वरच्छर्दिविषापहम्।।88।।
मोहदाहज्वरभ्रान्तिकुष्ठविस्फोटशान्तिकृत्।
(धन्व. नि. चन्दनादि वर्ग 88)

## पाटला (मूल)

1. पाटला तुवरा तिक्ताऽनुष्णां दोषत्रयापहा
अरूचिश्वासशोथास्त्रच्छर्दिहिक्कातृषाहरी।(21)
(भा.नि., गुडुच्यादि वर्ग, 21)

2. पुष्पं कषायं मधुरं हिमं हृदयं कफास्त्रनुत्
पित्तांतिसारहृत्कण्ठयं फलं हिक्काऽस्त्रपित्तहृत। (22)
(भा.नि., गुडुच्यादि वर्ग, , 22)

3. पाटलाऽनुष्णा तिक्ता दोषत्रयापहा
अरूचिश्वासशोफास्त्रच्छर्दिहिध्मातृषापहा।(37)
(कै.नि., ओषधि वर्ग, 37)

4. पाटलाऽपि रसे तिक्ता गुरूष्णा पवनास्त्रजित् तु।
पित्तहिक्कावमी शोफकफारोचक नाशिनी।।117।।
(धन्व.नि., गुडुच्यादि वर्ग, 117)

## फल्गु (फल)

1. विष्टम्भिमधुरं स्निग्धं फल्गुजं तर्पणं गुरू ।(196)
(सु.सू. 46)

2. काकोदुम्बरिका फल्गुर्मलयूर्जघनेफला
मलयु: स्तम्भकृत्तित्का शीतला तुवरा जयेत्।
कफपित्त व्रणश्चित्रकुष्ठपाण्ड्वर्शकामला: ।(10)
(भा.प्र.वर्ग,10)

3. फल्गुस्तु तुवरा तिक्ता शीतला स्तम्भनी जयेत् ।(449)
कफपित्त व्रणश्वित्रकुष्ठ पाण्ड्वस्त्रकामला: ।
फलं तु शीतलं स्वादु कषायं गुरू तर्पणम् ।(450)
शुक्रलं मधुरं पाके स्निग्धं विष्टम्भि बृंहणम्
ग्राहि वातकफपित्तक्षतदाहविषास्त्रजित् ।(451)
(कै.नि. ओषधि वर्ग, पृ.449-451)

4. तर्पणं बृंहणं फल्गु गुरू विष्टम्भि शीतलम् ।(386)
(च.स.)

5. काकोदुम्बरिका शीता पक्वा गौल्याऽम्लिका कटु:
त्वग्दोषपित्तरक्तघ्नी तद्वल्कं चातिसारजित्। (134)
(रा.नि. आम्रदि वर्ग, 134)

6. काकोदुम्बरिका श्वित्रकण्डूकुष्ठव्रणापहा
रक्तपित्तहरा शोफ पाण्डुश्लेष्महरा च सा ।(82)
(ध.नि.वर्ग आम्रदि वर्ग, 82)

## फल्गु (मूल)

1. काकोदुम्बरिका फल्गुर्मलयूर्जवनेफला
मलयुः स्तम्भकृत्तिक्ता शीतला तुवरा जयेत्।
कफपित्त व्रणश्वित्र कुष्ठपाण्ड्वर्शकामलाः।(10)

(भा.प्र.वटादिवर्ग, 10)

2. फल्गुस्तु तुवरा तिक्ता शीतला स्तम्भनी जयेत्।।449।।
कफपित्तव्रणश्वित्र कुष्ठपाण्ड्वस्रकामलाः।।450।।

(कै.दे.नि. ओषधि वर्ग, 449-450)

3. काकोदुम्बरिका श्वित्रकण्डू कुष्ठव्रणापहा
रक्तपित्तहरा शोफा पाण्डु श्लेष्महरा च सा।(82)

(ध.नि.पृ. आम्रादि वर्ग, 82)

4. काकोदुम्बरिका शीता कषाया दद्रुघातनी
रक्तारिसार हन्त्री च मुखनासास्रघातिनी।(शोढल)

## चक्रमर्द (प्रपुन्नाड) (बीज)

चक्रमर्दः प्रपुन्नाटो द्रुघ्नो मेषलोचनः ।
पद्माटः स्यादेड जश्चक्री पुन्नाट इत्यपि ।।110।।

चक्रमर्दो लघुः स्वादू रुक्षः पित्तानिलापहः ।
हृद्यो हिमः कफश्वासकुष्ठदद्रुकृमीन्हरेत् ।।211।।

हन्त्युष्णं तत्फलं कुष्ठकण्डूदद्रुविषानिलान् ।
गुल्मकासक्रिमिश्वासनाशनं कटुकं स्मृतम् ।।212।।
(भा.प्र.,हरीतक्यादि वर्ग,110-112)

चक्रमर्दस्त्वेडगजो मेषाक्षिकुसुमस्तथा ।
प्रपुन्नाटस्तरवटश्चक्राह्वश्चक्रिकस्तथा ।।4।।
(धन्व. नि., करवीरादि वर्ग, 4)

दद्रुघ्नः स्थादेजगजः क्षोडको मर्दकस्तथा ।
आर्वतकस्त्वेडगजः चक्रमर्दश्च च चक्रिका ।।699।।

पमाड़ो मेषकुसुमः प्रपुन्नाटप्रपुन्नटः ।
प्रपुन्नाटो हिमो रुक्षो हृद्यः स्वादुःपटुर्लघुः ।।700।।

विष्टंभी सृष्टविण्मूत्रः कुर्यात् पित्तानिलौ हरेत् ।
कफकुष्ठज्वरश्वासकासमेहारुचिकृमीन् ।। 701।।

प्रपुन्नाटस्य शाकं तु कफकुष्ठानिलापहम् ।
पित्तप्रकोपणं बल्यं दद्रुपामाहरं गुरू ।।702।।

तत्फलं कटुकं सोष्णं जयेत् कुष्ठकफानिलान्।
विषकण्डूगुल्मदद्रुश्वासकासकृमीन् जयेत् ।।703।।
(कैयदेव नि., ओषधि वर्ग, 699-703)

## रक्त चन्दन (का.म.)

रक्तचन्दनमाख्यातं रक्ताङ्गं क्षुद्रचन्दनम् ।
तिलपर्ण रक्तसारं तत्प्रवालफलं स्मृतम् ।।16।।

रक्तं शीतं गुरू स्वादुच्छर्दितृष्णाऽस्त्रपित्तहत् ।
तिक्तं नेत्रहितं वृष्यं ज्वरव्रणविषापहम् ।।17।।
(भा.प्र., कर्पूरादि वर्ग, 16-17)

रक्तचन्दनमप्याहु रक्षोघ्नं तिक्तशीतलम् ।
रक्तोद्रेकहरं हन्ति पित्तकोपं सुदारुणम् ।।5।।
(धन्व. नि.,चन्दनादि वर्ग, 5)

चन्दनं शीतलं रूक्षं तिक्ताभं ह्लादनं लघु ।
श्रमशोषविषश्लेष्मतृष्णापित्तास्रदाहत् ।।
(कैयदेव नि., ओषधि वर्ग, 1257)

## रक्तपुनर्नवा (मूल)

तेषु पौनर्नवं शाकं विशेषाच्छोफनाशनम् ।।255।।

(सु., सूत्र स्थान 46,255)

रक्तपुनर्नवा तिक्ता सारिणी शोफनाशिनी ।
रक्तप्रदर दोषघ्नी पाण्डुपित्तप्रमर्दिनी ।।

(रा.नि., पर्पटादि वर्ग, 120)

पुनर्नवाऽरुणा तिक्ता कटुपाका हिमा लघुः ।।
वातला ग्राहिणी श्लेष्म पित्त रक्त विनाशिनी ।।233।।

(भा.प्र., गुडुच्यादि वर्ग. 233)

पुनर्नवा भवेदुष्णा तिक्ता रुक्षा कफापहा ।
सशोफ पाण्डुहृद्रोगकोसोरः क्षतशूलनुत् ।।275।।

(धन्व.नि.गुडुच्यादिवर्ग, 275.)

वर्षाभूर्मधुरा तिक्ता कषाया कटुका सरा ।।753।।

(कै.नि. ओषधि वर्ग, 753.)

## रामशीतलिका (सं.व.)

1. रक्तमार्षो गुरूर्नाति सक्षारो मधुर: सर:
श्लेष्मल: कटुक: पाके स्वल्पदोष उदीरित: ।।11।।
(भा.प्र.नि. शाकवर्ग, 11)

2. आरामशीतला तिक्ता शीतला पित्तहारिणी
दाहशोषप्रशमनी विस्फोटव्रणरोपणी ।(172)
(रा.नि.करवीरादिवर्ग 172)

## रास्ना (पत्र)

1. रास्नाऽऽमपाचिनी तिक्ता गुरूष्णा कफवातजित्
शोथश्वाससमीरास्नवातशूलोदरपहा कास ज्वर
विषाशीतिवातिकामयसिध्महत्। (163-164)

(भा.प्र.नि.हरीत्क्यादिवर्ग,163-164)

2. रास्ना तिक्ता गुरूष्णामपाचनी कफपित्तहा
निहन्ति शोफवातस्त्रश्वासकासविषज्वरान्।(1043)
हिघ्माशीतावाताढ्य वातशूलोदराणि च।

(कै.दे.नि. ओषधिवर्ग 1043)

3. रास्नागुरूश्च तिक्तोष्णा विषवातास्त्रकासजित्।
शोफकम्पोदरश्लेष्मशमन्यामस्य पाचनी।।261।।

(ध.नि., गुडुच्यादि वर्ग, 261)

## सहचर (सं.व)

सैरयक: श्वेतपुष्प: सैरेय: कटसारिका ।
सहाचर: सहचर: स च भिन्द्यपि कथ्यते ।।51।।
कुरण्टकोऽत्रपीते स्याद्रक्त कुरबक: स्मृत: ।
नीले बाणाद्वयोरुक्तो दासी चार्तगलश्च स: ।।52।।
सैरेय: कुष्ठवातास्रकफकण्डू विषापह: ।
तिक्तोष्णो मधुरोऽनम्ल: सुस्निग्ध: केशरञ्जन ।।53।।
(भा.प्र., पुष्पवर्ग, 51-53)

सैरेयक: सहचर: सैरेयो मृदुकण्टक: ।।1047।।
कोमलप्रसवो दासी वर्णाख्य: किंकिरातक: ।
झिण्टी सहचरोऽम्लान: सैर्यकश्च महासहा ।।1048।।
रक्तपुष्प: कुरबक: पीतपुष्प: कुरण्टक: ।
नीलपुष्पस्त्वार्त्तगलो राजसैरेयक: स्मृत: ।।1049।।
बाणस्त्वोदनपाकी स्यात् शाणक: केशरञ्जन: ।।1050।।
केश्यो बलासवातास्रकुष्ठकण्डूविषं जयेत् ।
(कै.दे.नि.ओषधिवर्ग, 1047-1050)

## सहदेवी (सं.व.)

1. सहदेवीशिफा बद्धा श्वेतमूत्रेण कन्यया
निहन्ति दक्षिणे पाणौ ज्वरमूतग्रहादिकान्।

(वै.म.)

2. ज्वरं हन्ति शिरोबद्धा सहदेवीजटा यथां ।

(च.सू. 26)

## शैलेयम (सं.व.)

1. शैलेयम शीतलं हृदयं कफपित्तहरं लघु
कण्डूकुष्ठाश्मरीदाहविष हृद् गुदरक्तहृत्।।91।।
(भा.प्र., कर्पूरादिवर्ग- 91)

2. शैलेयं पलितं वृद्धं जीर्णकालानुसार्यकम्
स्थविरं च शिलादद्रु शिलापुष्पं शिलोद्भवम्।।72।।

3. शैलेयकं हिमं प्रोक्तं दाहजिद्विषनाशनम्
रक्तदोषहरं चैव कण्डू निर्मूलनं स्मृतम्।।73।।
शैलेयं तिक्तकं शीतं सुगन्धि कफपित्तजित्
दाहतृष्णावमिश्वासव्रणदोषविनाशनम्।।74।।
(धन्व.नि., चन्दनादिवर्ग 72-74)

4. शैलेयं स्थविरं वृद्ध शैलेजं पलितं ग्रहम्
शिलापुष्पं शिलादद्रु जीर्ण कालानुसार्यकम्।।88।।
शैलेयं शीतलं रूच्यं लघु श्लेष्मज्वरापहम्
निहन्ति विषदाहास्रकण्डुकुष्ठाश्महृद्गदान्।।89।।
(कैयदेव नि., धातुवर्ग, 88-89)

## शाक (का.म.)

परूषकं ------------------------------- फलम् ।
राजाह्वं -------------शाकं तृणमूत्रामय वातजित् ।।
(अ.ह.सू., परूषकादिगण, 15/13)

असनति ------------------------------- प्रकीर्या: ।
त्रिहिमतल पलाशा जोड्.गक: शाकशालौ ।
असनादि विंजयते श्वित्र कुष्ठ कफक्रिमीन् ।
पाण्डुरोगं प्रमेहं च मेदोदोष निबर्हण: ।।
(अ.ह.सू., असनादि गण, 15/19-20)

भूमिसहो द्वारदारूर्वरदारू: खरच्छद: ।
भूमिसहस्तु शिशिरो रक्तपित्तप्रसादन: ।।
(भा.प्र.वटादिवर्ग, 77)

शाक: कषाय: शिशिरो रक्तपित्त प्रसादन: ।।
कुष्ठश्लेष्मानिल हरो गर्भ संधानस्थैर्य्यकृत ।।
(कै.नि., ओषधिवर्ग, 806-807)

## शाखोटका (शा.त्वक्.)

1. शाखोटो रक्तपित्तार्शोवातश्लेष्मातिसारजितं ।।64 ।।

(भा.प्र.नि. वटादिवर्ग 64)

2. शाखोटोवल्कलक्वाथं गोमूत्रेण युतं पिबेत्
श्लीपदानां विनाशाय मेदोदोषनिवृत्तये।

(शा.)

3. शाखोटः स्याद . . . . . . . . . .
कौशिक्योऽजाक्षीरनाशश्च सूक्तस्तिक्तोष्णोऽयं
पित्तकृद् वातहारी ।।123 ।।

(रा.नि., प्रभद्रादिवर्ग, 123)

## शालपर्णी (मूल)

1. स्थिरा. . . . . . . . इति दशोमानि बल्यानि भवन्ति।(7)

2. विदारिगन्धा. . . . . इति दशोमानि अंगमर्दप्रशमनानि भवन्ति।।44)।।

(च.सू. स्थान अ.4)

3. विदारिगन्धा वृष्य सर्व दोषहराणाम्।।40।।

(च.सू. स्थान अ. 25, 40)

4. शालपर्णी रसे तिक्ता गुरूष्णा वातदोषजित्
विषम ज्वरमेहार्शः शोफसन्तापनाशनी।।88।।

(ध.नि.गुडूच्यादिवर्ग 88)

5. शालपर्णी स्थिरा सौम्या त्रिपर्णी पीवरी गुहा
विदारिगन्धा दीर्घाङ्गी दीर्घपत्रांऽशुमत्यपि।।31।।
शालपर्णी गुरूश्छर्दिज्वरश्वासातिसारजित्।।32।।
शोषदोषत्रयहरी बृंहण्ययुक्ता रसायनी।
तिक्ता विषहरी स्वादुः क्षतकासकृमिप्रणुत्।।33।।

(भा.प्र.नि. गुडूच्यादिवर्ग 31-38)

## शाली (फल)

1. शालयो मधुरा: स्निग्धा बल्या बद्धाल्पवचर्स:
कषाया लघवो रूच्या: स्वर्या वृष्याश्च बृंहणा:।
अल्पानिलकफा: शिता: पित्तघ्ना मूत्रलास्तया।।7।।
(भा.नि., धान्यवर्ग, 7)

2. शीतो गुरूस्त्रिदोषघ्नो मधुरो गौरषष्टिक:
किञ्चित् ततो गुरूस्तस्मादपरो रसपाकत:।(64)
(ध.नि.64, सुवर्णादिवर्ग )

3. शालयो लघव: स्निग्धा मधुरा रसपाकत:।।7।।
कषाज्ञयानुरसा हृद्या रूच्याबद्धाल्पवर्चस:
शीतला बृंहणा वृष्या लघुपाकातिमूत्रला:।।8।।
पित्तघ्नाल्पानिलकफा बल्या: स्वर्या: ज्वरापहा:।
(कै.नि.धान्यवर्ग 7-8)

## शाल्मली (शा.त्वक्.)

शाल्मलिस्तु भवेन्मोचा पिच्छिला पूरणीति च
रक्तपुष्पा स्थिरायुश्च कण्टकाढया च तूलिनी।।54।।
शाल्मली शीतला स्वाm द्वी रसे पाके रसायनी
श्लेष्मला पित्तवातास्रहारिणी रक्तपित्तजित्।।55।।

(भा.नि.वटादि वर्ग 54-55)

## शण (बीज)

शणस्तु माल्यपुष्पः स्याद्वमनः कटुतिक्तकः
निशावनो दीर्घशाखस्त्वकसारो दीर्घपल्लवः ।।75।।
शणस्त्वम्लः कषायश्च मलगर्भास्रपातनः
वान्तिकृद्वातकफनुज्ज्ञेयस्तीव्रमङ्गमर्दजित्।

(रा.नि.शताह्वदिवर्ग 75-76)

## शर (मूल)

शरद्वयं स्यान्मधुरं सतिक्तं कोष्णं कफभ्रान्तिमदापहारि ।
बलं च वीर्यं च करोति नित्यं निषेवितं वावकरं च किञ्चित् ।।121।।
(धन्वन्तरि निघण्टु, करवीरादिश्चतुर्थो वर्ग, 121)

मुञ्जद्वयन्तु मधुरं तुवरं शिशिरं तथा ।।
दाहतृष्णाविसर्पास्त्र मूत्रकृच्छ्राक्षिरोगजित् ।
दोषत्रयहरं वृष्यं मेखलासूपयुज्यते ।।160।।
(भा.प्र.नि., गुडूच्यादि वर्ग 159-160)

शरद्वयं स्यान्मधुरं सुतिक्तं कोष्णं कफभ्रान्तिमदापहारि ।
बलञ्च वीर्यञ्च करोति नित्यं निषेवितं वातकरंच किञ्चित ।।83।।
(राजनिघण्टु, शाल्मल्यादि वर्गः, 83 )

मुञ्जः कषायो मधुरोऽनुष्णो वृष्योऽक्षिरोगजित् ।
दोषास्त्रदाहतृण्मूत्रवस्तिशूल विसर्पनुत् ।।244।।
(कै.दे.नि. ओषधिवर्ग, 1244)

## सरल (का.म.)

सरलःपीतवृक्षः स्यात्तथा सुरेभिदारुकः।
सरलो मधुरस्तिक्तो कटुपाकरसो लघुः।।26।।
स्निग्धोष्णः कर्णकण्ठाक्षिरोगरक्षोहरः स्मृतः।
कफानिलस्वेददाहकासमूर्च्छाव्रणापहः।।27।।
(भा.प्र.नि., कर्पूरादिवर्ग 26-27)

सरलः पूतिकाष्ठं च चीडा पूतिद्रुमोमतः।
दीपावृक्षः स्निग्धदारुः प्रोक्तो मारीच पत्रकः।।77।।
सरलः स्निग्ध तिक्तोष्ण कफमारुतनाशनः।
वक्त्रस्रावस्वरभ्रंशनेत्ररोग ब्रणान्त कृत।।78।।
(धन्व. नि., चन्दनादिवर्ग, 77-78)

उत्थितः सरलः चीडः खलिर्मरिचपत्रकः।।1311।।
पीतवृक्षो दीपवृक्षः पूतिदारु कलिद्रुमः।
नमेरु र्नन्दनो दारुः सुरदारु सुदारु च।।1312।।
सरलो मधुरस्तिक्तः कटुपाकरसो लघुः।
स्निग्धोष्णः कर्णकण्ठाक्षिरोगघ्नो विनियच्छति।।1313।।
रक्षोऽलक्ष्मीव्रणस्वेदयूका कासकफानिलान्।
(श्रीवासः सरलस्रावः श्रीवेष्टो वृक्षधूपकः)
श्रीवेष्टो दधिसाह्वस्तु श्रीवासः श्रीनिवासकः।।1314।।
चीडास्रावः क्षीरशीर्षः पायसोः रक्तशीर्षकः।
वेष्टको विष्टको दासी कलिद्रुस्तडितस्तडी।।1315।।
श्रीवासो मधुरस्तिक्तः स्निग्धोष्णस्तुवरः सरः।
पित्तलो वातमूर्द्धाक्षिस्वररुक्कफपीनसान्।।1316।।
रक्षोघ्नः स्वेददौर्गन्ध्ययूकाकण्डूव्रणान् जयेत्।
(कैयदेव निघन्टु, ओषधिवर्ग, 1311-1316)

## सरल (मूल)

1. उत्थितः सरलः चीडः खलिर्मरिचपत्रकः ।।1311।।
पीतवृक्षो दीपवृक्षः पूतिदारु कलिद्रुमः ।
नमेरु र्नन्दनो दारुः सुरदारु सुदारु च।।1312।।
सरलो मधुरस्तिक्तः कटुपाकरसो लघुः ।
स्निग्धोष्णः कर्णकण्ठाक्षिरोगघ्नो विनियच्छति।।1313।।
रक्षोऽलक्ष्मीव्रणस्वेदयूका कासकफानिलान् ।

2. श्रीवेष्टो दधिसाह्वस्तु श्रीवासः श्रीनिवासकः।।1314।।
चीडास्त्रावः क्षीरशीर्षः पायसोः रक्तशीर्षकः ।
वेष्टको विष्टको दासी कलिद्रुस्तडितस्तडी।।1315।।
श्रीवासो मधुरस्तिक्तः स्निग्धोष्णस्तुवरः सरः ।
पित्तलो वातमूर्द्धाक्षिस्वररुक्कफपीनसान्।।1316।।
रक्षोघ्नः स्वेददौर्गन्ध्ययूकाकण्डूव्रणान् जयेत्।
(कैयदेव निघन्टु ओषधिवर्ग)

3. सरलः पूतिकाष्ठं च चीडा पूतिद्रुमोमतः ।
दीपवृक्षः स्निग्धदारुः प्रोक्तो मारीच पत्रकः।।77।।

4. सरलः स्निग्ध तिक्तोष्ण कफमारुतनाशनः ।
वक्त्रस्त्रावस्वरभ्रंशनेत्ररोग व्रणान्त कृत्।।78।।
(धव. नि. चन्दनादिवर्ग, 78)

5. सरलःपीतवृक्षः स्यात्तयो सुरेभिदारुकः ।
सरलो मधुरस्तिक्तो कटुपाकरसो लघुः।।26।।
स्त्रिग्धोष्णः कर्णकण्ठाक्षिरोगरक्षोहरः स्मृतः ।
कफानिलस्वेददाहकासमूर्च्छाव्रणापहः।।27।।
(भा.प्र.नि., कर्पूरादिवर्ग 26-27)

## सर्षप (बीज)

सर्षपः कटुकः पाके रसे हृद्यः सतिक्तकः ।
तीक्ष्णोष्णो कफवातघ्नो रक्तपित्ताग्निवर्द्धनः ।।91।।
किञ्चिद्रूक्षो जयते कुष्ठं कण्डूकंठग्रहक्रमीन् ।

(कै.नि.,धान्यवर्ग 91-1/2)

गौर सर्षप कोऽत्युष्णो रक्षोघ्नः कफवातजित् ।
कृम्यामकण्डूकुष्ठघ्नः श्रुतिशीर्षानिलार्जित् ।
तद्वद्रक्तस्तु सिद्धार्थस्तिक्तः स्निग्धोष्णकः कटु ।।40।।

(धन्व.नि., करवीरादिवर्ग 40)

## शतपत्रीका (पुष्प)

शतपत्री हिमातिक्ता कषाया कुष्ठनाशनी।
मुखस्फोटहरा रुच्या सुरभिः पित्तदाहनुत्।।80।।

(रा.नि., करवीरादिवर्ग 80)

शतपत्री तरुण्युक्ता कर्णिका चारुकेशरा।
महाकुमारी गन्धाढ्या लाक्षा पुष्पातिमंजुला।।18।।
शतपत्री हिमाहृद्या सारिणी शुक्रला लघु।
वातपित्तास्रजिद वर्ण्या कट्वी तिक्त च पाचनी।।19।।

(भा.प्र.पुष्पवर्ग 18-19)

**शिंशपा (का.म.)**

1. साल. . . . शिंशपा. . . . . कालीयकं चेति
सालसारादिरित्येष गणः कुष्ठविनाशनः ।
मेहपाण्ड्मयहरः कफमेदोविशोषणः ।
(सु.सू. 38/8-9)

2. मुष्क . . . . . . शिंशपा. . . . . त्रिफला चेति।
मुष्ककादिर्गणो ह्योष मेदोघ्नः शुक्रदोषहृत् ।
मेहार्शः पाण्डु रोगाश्म शर्करानाशनः परः।
(सु.सू. 38/20-21)

3. सरल देवदारूशिंशपागुरूण्डीरसारस्नेहास्तिक्त कटुकषाया
दुष्टव्रणशोधनाः कृमिकफकुष्ठानिल हराश्च।
(सु.सू. 45/123)

4. असनतिनिश . . . . . . . . . . शिंशिपामेषश्रृङ्गयः।
- - - - - - - - - - - - - - - - अश्वकर्णाः।।
असनादिर्विजयते श्वित्रकुष्ठकफक्रिमीन्।
पाण्डुरोगं प्रमेह च मेदोदोषनिर्वहणः।
(अ. हृ.चि. 15/17-20)

5. मुष्कक . . . . . . . . . . . . शिंशपाः
गुल्ममेहाश्मरीपाण्डुमेदोर्शः कफशुक्रजित्।
(अ. हृ.चि. 15/32)

6. शिंशपाक्षारसिद्धं च क्षीरमाशु ज्वरापहम्।
(अ.हृ.चि. ।/115)

7. शिंशपा पिच्छिलाश्यामा कृष्णसारा च सा गुरू
कपिला सेव मुनिभिर्भस्मगर्भेतिकीर्त्तिता ।।24।।
शिंशपा कटुका तिक्ता कषाया शोषहारिणी
उष्णवीर्या हरेन्मेदः कुष्ठश्वित्रवमिक्रिमीन।
बस्तिरूग्व्रणदाहास्त्रबलासान गर्भपातिनी।।25।।
(भा.प्र.वटादिवर्ग, 24-25)

8. शिंशपा तु महाश्यामा कृष्णसारा स्मृताऽगुरू:
कुशिंशपाऽन्या कपिला भस्मगर्भा वसादनी ।
शिंशपायुगलं वर्ण्यं हिक्काशोफौ विसर्जयेत्
पित्तदाहप्रशमनं बल्यं रूचिकरं परम्।
(ध.नि.आम्रदिवर्ण 111-112)

9. श्यामादि शिंशपा तिक्ता कटूष्णा कफवातनुत्
नष्टाजीर्णहरा दीप्याशोफतीसारहारिणी।।127।।
(रा.नि.प्रभद्रादिवर्ग, 127।।)

10. शिंशपा कटुका तिक्ता कषाया गर्भपातिनी
उष्णवीर्या हरेन्मेद: कफदाहवमिव्रणान्।
शोषकुष्ठकृमिश्वित्रबस्तिरूक्पीनसानपि।।979।।
(कै.नि.औषधिवर्ग 979)

## शिंशपा (शा.त्वक्.)

1. शिंशपा कटुका तिक्ता कषाया शोषहारिणी
उष्णवीर्या हरेन्मेदः कुष्ठश्वित्रवमिक्रिमीन।
बस्तिरूग्व्रणदाहास्त्रबलासान गर्भपातिनी।
(भा.प्र.वटादिवर्ग, 25)

6. शिंशपासारस्नेहास्तिक्त कटुकषाया दुष्व्रणशोधनाः
कृमिकफकुष्ठानिलहराश्च ।
(सु.सू. 45)

7. शिंशपायुगलं वर्ण्यं हिक्काशोफौ विसर्जयेत्
पित्तदाहप्रशमनं बल्यं रूचिकरं परम्।।112।।
(ध.नि., आम्रादिवर्ग, 112)

8. शिंशपा कटुका तिक्ता कषायागर्भपातनी
उष्णवीर्या हरेन् मेदः कफदाहवमिव्रणान्।।979।।
शोष कुष्ठ कृमिश्वित्र बस्तिरूक्पीनसानपि।
(कै.नि. औषधिवर्ग 979)

8. शिंशपा तु महाश्यामा कृष्णसारा स्मृताऽगुरू:
कुशिंशपाऽन्या कपिला भस्मगर्भा वसादनी ।
शिंशपायुगलं वर्ण्यं हिक्काशोफौ विसर्जयेत्
पित्तदाहप्रशमनं बल्यं रूचिकरं परम्।
(ध.नि.आम्रादिवर्ण 111-112)

9. श्यामादि शिंशपा तिक्ता कटूष्णा कफवातनुत्
नष्टाजीर्णहरा दीप्याशोफतीसारहारिणी।।127।।
(रा.नि.प्रभद्रादिवर्ग, 127।।)

10. शिंशपा कटुका तिक्ता कषाया गर्भपातिनी
उष्णवीर्या हरेन्मेद: कफदाहवमिव्रणान्।
शोषकुष्ठकृमिश्वित्रबस्तिरूक्पीनसानपि।।979।।
(कै.नि.औषधिवर्ग 979)

## शिंशपा (शा.त्वक्.)

1. शिंशपा कटुका तिक्ता कषाया शोषहारिणी
उष्णवीर्या हरेन्मेदः कुष्ठश्वित्रवमिक्रिमीन।
बस्तिरूग्व्रणदाहास्रबलासान गर्भपातिनी।

(भा.प्र.वटादिवर्ग, 25)

6. शिंशपासारस्नेहास्तिक्त कटुकषाया दुष्व्रणशोधनाः
कृमिकफकुष्ठानिलहराश्च ।

(सु.सू. 45)

7. शिंशपायुगलं वर्ण्य हिक्काशोफौ विसर्जयेत्
पित्तदाहप्रशमनं बल्यं रूचिकरं परम्।।112।।

(ध.नि., आम्रादिवर्ग, 112)

8. शिंशपा कटुका तिक्ता कषायागर्भपातनी
उष्णवीर्या हरेन् मेदः कफदाहवमिव्रणान्।।979।।
शोष कुष्ठ कृमिश्वित्र बस्तिरूक्पीनसानपि।

(कै.नि. औषधिवर्ग 979)

## शिरीष (शा.त्वक्.)

शिरिषो मधुरोऽनुष्णास्तिक्तश्च तुवरो लघुः
दोषशोथविसर्पघ्नः कासव्रण विषापहः ।।14।।
(भा.प्र.नि.वटादि वर्ग- 14)

तिक्तोष्णो विषहा वर्ण्यस्त्रिदोषशमनो लघुः
शिरीषः कुष्ठकण्डूत्वग दोष श्वास कासहा ।।103।।
(ध.नि.आम्रादिवर्ग 103)

शिरीषो मधुरोऽनुष्णः सतिक्तस्तुवरो लघुः
निहन्ति दोषसर्प शोफ कास विषव्रणान्।।975।।
(कै.नि.औषधिवर्ग 975)

शिरीषः कटुकः शीतो विषवातहरः परः
पामासृक्कुष्ठकण्डूति त्वगदोषस्य विनाशनः।।60।।
(रा.नि. प्रभद्रादिवर्ग 60)

शिरीषो विषहनानाम्।
(च.सू.अ ......)

## स्थौणेय (पत्र)

एला ------- स्थौणेयक ------- नागकेशरं चेति ।
एलादिकोवातकफौ निहन्याद्विषमेव च ।
वर्णप्रसादनः कण्डूपिडकाकोठनाशनः ।।

(सुश्रुत सं. सूत्र 38/25)

स्थौणेयकं बर्हिबर्हं शुकबर्हञ्च कुक्कुरम् ।
शीर्णरोगशुकञ्चापि शुकपुष्पं शुकच्छदम्. ।।109।।
स्थौणेयकं कटु स्वादु तिक्तं स्निग्धं त्रिदोषनुत् ।।110।।
मेधाशुक्रकरं रुच्य रक्षोघ्नं ज्वरजन्तुजित्।।
हन्ति कुष्ठासतृड्दाह दौर्गन्ध्यतिलकालकान् ।।111।।

(भा.प्र. कर्पूरादिवर्ग, 109-111)

स्थौणेयकं बर्हिचूडं शुकपुष्पं शुकच्छदम्।
विकर्णं शुकबर्हं च हरित शीर्णरोमकम् ।।68।।
स्थौणेयं कफवातघ्नं सुगन्धि कटुतिक्तम् ।
पित्तप्रकोपशमनं बलपुष्टिविवर्धनम् ।।69।।

(ध.नि., चन्दनादिवर्ग, 68,69)

स्थौणेयकं बर्हिशिखं शुकच्छदं मयूरचूड़ं शुकपुच्छकं तथा ।
विकीर्णरोमापि च कीरवर्णकं विकर्णसंज्ञं हरितं नवाह्वयम् ।।129।।
स्थौणेयं कफवातघ्नं सुगन्धि कटुतिक्तकम् ।
पित्तप्रकोपशमनं बलपुष्टिविवर्द्धनम् ।।130।।

(राजनिघण्टु, चन्दनादिवर्ग,129-130)

स्थौणेयकं तिक्तकं स्निग्धं गुरू स्वादु त्रिदोषनुत् ।
मेधा शुक्रकरं रुच्यं रक्षाघ्नं ज्वरजन्तुजित् ।।
हन्ति कुष्ठास्रतृड्दाह दौर्गन्ध्यतिलकालकान् ।

(कै.नि. ओषधिवर्ग,380)

स्थौणेयकं बहिश्चूडं शुकच्छदम् ।।
स्थौणेयकं शीतलं वृष्यं मेध्यं दोषत्रयास्रजित् ।।

(म.नि. कर्पूरादि वर्ग,52)

## सूरण (कन्द)

सूरणः कन्द ओलश्च कन्दलोऽर्शोघ्न इत्यपि ।
सूरणो दीपनोरूक्षः कषायः कण्डुकृत् कटुः ।।91।।
विष्टम्भी विशदो रूच्यः कफार्शःकृन्तनो लघुः ।
विशेषादर्शसे पथ्यः प्लीहगुल्मविनाशनः ।
सर्वेषां कन्दशाकानां सूरणः श्रेष्ठ उच्यते ।।92।।
दद्रूणां कुष्ठिनां रक्तपित्तिनां न हितो हि सः ।
सन्धानयोगं सम्प्राप्तः सूरणो गुणवत्तरः ।।93।।
(भा.नि. शाकवर्ग;91-93)

अर्शोघ्नः सूरणः कन्दो कण्डूलश्चित्रदंडकः ।
समष्ठीलोऽपरश्चौल्ल उल्ल ओल्लोवनोद्भवः ।।
सूरणो विशदो रूक्षः कषायः कटुको लघुः ।
विष्टम्भी दीपनो रूच्योबलास गुदकीलहृत् ।।
(कै.नि.ओषधीवर्ग;1588-1589)

सूरणः कटुकरूच्यदीपनः पाचनः क्रिमिकफानिलापहः ।
श्वासकासवमनार्शसां हरः शूलगुल्मशमनोऽस्त्रदोषकृत् ।।
(रा.नि., मूलकादि वर्ग, 64)

## श्वेत चन्दन (का.म.)

1. चन्दनं शीतलं रूक्षं तिक्तमाह्यदनं लघु
श्रमशोषविषश्लेष्मतृष्णापित्तास्रहनुत ।।13।।
(भा.नि.कर्पूरादिवर्ग 13)

2. चन्दनं दुर्गंधहरदाहनिर्वापणलेपनानाम्।
(च.सू.25)

3. चन्दनं शीतलं स्वादु तिक्तं पित्त विनाशनम्
रक्तप्रसादनं वृष्यमन्तर्दाहापहारकम्।।2।।
पित्तास्रविषतृड्दाह कृमिघ्न गुरू रुक्षणम्
सर्वसतिक्त मधुरं चन्दनं शिशिरं परम्।।3।।
(ध.नि., चन्दनादि वर्ग, 2-3)

## श्योनाक (पत्र)

1. श्योनाको दीपनः पाके कटुकस्तुवरो हिमः
ग्राही तिक्तोऽनिलश्लेष्म पित्त कास प्रणाशनः ।।26।।
(भा.प्र.नि.गुडूच्यादिवर्ग 26)

2. श्योनाक कटुकः पाके कषायस्तिक्तको हिमः
संग्राही दीपनः कासश्लेष्म पित्तामवातजित्।
(कै.दे.नि. औषधिवर्ग 41)

3. टिण्टुकः शिशिरस्तिक्तो वस्तिरोगहरः परः
पित्तश्लेष्ममामवातातीसार कासारूचीर्जयेत्।।113।।
(ध.नि., गुडुच्यादि वर्ग, वर्ग, 113)

## ताल (पु.मंजरी)

ताल प्रलम्बं स्यादुरःक्षतरुजापहम् ।।115।।
खर्जूरं तालशस्यं च रक्तपित्तक्षयापहम् ।

(च सू. स्थान 27. 115)

तालोध्वजद्रुमः प्रांशुदीर्घस्कन्धो दुरारुहः ।
तृणराजो दीर्घ तरुरव्यपत्रो द्रुमेश्वरः ।।61।।
फलं स्वादु रसे पाके तालजं गुरू पित्तजित्
तद्बीजं स्वादुपाकं तु मूलं स्याद् रक्तपित्तजित् ।।62।।

(धन्वन्तरि निघण्टु : आम्रादि वर्ग, 61-62)

तालनालिकेरपनसमोचप्रभृतीनि ।।77।।
स्वादुपाकरसान्याहुर्वात पित्तहराणि च ।
बलप्रदानि स्निग्धानि बृहंणानि हिमानि च ।।178।।
फलं स्वादुरसं तेषां तालज गुरूपित्तजित् ।
तद्बीजं स्वादुपाकं तु मूत्रलं वातपित्तजित् ।।179।।

(सु. संहिता सू.स्थान, 46; 177-179)

तालस्तु मधुरः शीतो मेदः श्लेष्मबलप्रदः ।
शुक्रलो बृंहणो हन्ति वातपित्तव्रणकृमीन् ।।473।।
फलं तस्य गुरू स्निग्धं स्वादु बल्यं हिमं सरम् ।
विष्टंभि बृंहणं वृष्यं तर्पणं कफमांसकृत्।।474।।
रक्तपित्तानिलश्वास क्षयदाहक्षतव्रणान् ।
बीजं स्वादु रसे पाके मूत्रलं वातपित्तजित्।।475।।
पक्वं तालफलं पित्तश्लेष्मरक्तविवर्धनम् ।
दुर्जरं बहुमूत्रं च तन्द्राऽभिष्यन्दि शुक्रलम् ।।476।।
तालमज्जा तु तरुणः किंचित् मदकरो लघुः ।
श्लेष्मलो वातपित्तघ्नः सस्नेहो मधुरः सरः ।।477।।
श्लेष्मापहं स्याद् विष्टंभि पित्तकृत् शुक्रलं गुरू ।
तालस्य मस्तकं ज्ञेयं बस्तिशुद्धिकरं परम् ।।479।।

(कैयदेव निघण्टु, ओषधिवर्ग, 473-477 व 479)

## त्रिवृत (मूल)

1. त्रिवृत सुखविरेचनानाम् ।(च.सू. 25,श्लोक सं.2)
श्वेता त्रिवृद्रेचनी स्यात्स्वादुरूष्णा समीरहृवत्।
रूक्षा पित्तज्वरश्लेष्मपित्तशोथोदरापहा। (194)
(भा.प्र. गुडूच्यादि वर्ग 194)

2. कषाया मधुरा चोष्णा विपाकेकटुका त्रिवृत
कफपित्त प्रशमनी रूक्षा चानिलकोपनी। (239)
(ध.नि.गुडूच्यादिवर्ग 239)

3. त्रिवृदुष्णा कटुस्तिक्ता रूक्षा स्वाद्वी विरेचनी।

4. कषाया कटुका पाके वातला कफपित्तहा
ज्वर शोफोदर प्लीह पाण्डुव्रणविनाशिनी ।।1016।।
(कै.दे.नि., ओषधिवर्ग, 1016)

5. त्रिवृत्तिक्ता कटूष्णा च क्रिमिश्लेष्मो दरार्त्तिजित्
कुष्ठकण्डूव्रणान हन्ति प्रशस्ता च विरेचने।(167)
(रा.नि. पिप्पल्यादिवर्ग 167)

## तुम्बिनी (फल)

वर्चोभेदीन्यलाबूनि रूक्षशीतगुरूणि च ।
(च.सं.सू.27/112)

लम्बाऽथ कटुकालाबूस्तुम्बी पिण्डफला तथा ।
इक्ष्वाकुः फलिनी चैव प्रोच्यते ---------- ।।
कासश्वास विषच्छर्दिज्वरार्ते कफकर्षिते ।
प्रताम्यति नरे चैव वमनार्थं तदिष्यते् ।।
(च.कल्प . 3/3-4)

अलाबुर्भिन्नविट्का तु रुक्षा गुर्व्यतिशीतला ।
तिक्तालाबुरहृद्या तु वामिनी वातपित्तजित् ।।
(सु.सू. 46/215)

तुम्बं रूक्षतरं ग्राहि ------------- !! (अ.ह.सू.6/89)

मिष्टतुम्बीफलं हृद्यं पित्तश्लेष्मापहं गुरू ।
वृष्यं रुचिकरं प्रोक्तं धातुपुष्टिविवर्धनम् ।।167।।
इक्ष्वाकुः कटुतुम्बी स्यात्सा तुम्बी च महाफला ।
कासश्वासच्छर्दिहरो विषार्ते कफकर्षिते ।
इक्ष्वाकुर्वमने शस्त्रः प्रताम्यति च मानवे ।।168।।
कंटुतुम्बी कटुस्तिक्ता वातकृच्छ्वासकासजित् ।
कफघ्नी शोधनी शोफव्रणशूलविषापहा ।।169।।
(ध.नि. गुडुच्यादि वर्ग )
167-169

कटुतुम्बी कटुफला तुम्बिनी कटुतुम्बिनी ।
कटुतुम्बी कटुस्तीक्ष्ण वान्तिकृत् श्वासवातजित् ।
कासघ्नी शोधनी शोफ व्रणशूलविषापहा ।।
(रा.नि.गुडुच्यादिवर्ग;56-57)

अलाबुनालिका गुर्वी मधुरा पित्तनाशिनी ।
वातश्लेष्मकरी स्निग्धा शीतला मलभेदिनी ।।
तुम्बी तिक्ता कटु पाके वामनी वातपित्तजित् ।
अहृद्या शीतला कासश्वासज्वर विषापहा ।।

(कै.नि. ओषधिवर्ग;540-543)

मिष्टं तुम्बीफलं वृष्यं कफपित्तहरं गुरू ।
कटुतुम्बी हिमा हृद्या पित्तकास विषापहा ।।

(म.नि.शाकवर्ग;10-11)

## उदुम्बर (शु.फल)

उदुम्बरो हिमो रूक्षो गुरू: पित्तकफास्त्रजित् ।
मधुरस्तुवरो वर्ण्यो व्रणशोधनरोपण: ।।9।।
(भा.नि., वटादिवर्ग, 9)

औदुम्बरं कषायं स्यात् पक्वं तु मधुरं हिमम् ।
कृमिकृत रक्तपित्तघ्नं मूर्च्छादाह तृषापहम् ।।87।।
(ध.नि., आम्रादिवर्ग, 87)

उदुम्बरं कषायं स्यात्पक्वस्तु मधुरं हिमम्।
कृमिकृत्पित्तरक्तघ्नं मूर्च्छादाहतृषापहम् ।।128।।
(रा.नि., आम्रादिवर्ग, 128)

उदुम्बरो हिमो रूक्ष: कषायो मधुरो गुरू: ।।426।।
भग्नसंधानकृद् वर्ण्यो व्रणशोधनरोपण:।
स्तंभनानि कषायाणि श्लेष्मघ्नानि हितानि च ।।427।।
(कै. नि., ओषधिवर्ग, 426-427)

## उशीर (मूल)

उशीरं दाहत्वग्दोषस्वेदापनयन प्रलेपानाम् ।
(च.सू., 25/40)

उशीरं चामृणालं स्यादभयं समगन्धिकम् ।
रणप्रियं वीरतरु वीरं वीरणमूलकम् ।
उशीरं शीतलं तिक्तं दाहक्लान्तिहरं च तत् ।
वातघ्नं ज्वरतृण्मेहनुदुरक्तं हन्ति योगतः ।।
उशीरं स्वेददौर्गन्ध्य पित्तघ्नं स्निग्धतिक्तकम् ।
(ध.नि., चन्दनादि वर्ग 13-14)

वीरणस्य तु मूलं स्यादुशीरं नलदञ्च तत् ।
अमृणालञ्च सेव्यञ्च समगन्धिक मित्यपि ।।86।।
उशीरं पाचनं शीतं स्तम्भनं लघु तिक्तकम् ।।87।।
मधुरं ज्वरहृद्वान्तिमदनुत्कफपित्तहृत् ।
तृष्णाऽस्रविषवीसर्प दाहकृच्छ्रव्रणापहम् ।।88।।
(भा.प्र., कर्पूरादि वर्ग, 86-88)

## उत्पल (पुष्प)

1. कुमुदं पिच्छिलं स्निग्धं मधुरं हलादि शीतलम्।।15।।
(भा.प्र.पुष्पवर्ग 15)

2. कुमुदं पिच्छिलं स्निग्धं मधुरं हल्लादि शीतलम्।।1453।।
(के.दे.नि. औषधिवर्ग 1453)

3. उत्पलानि कषायाणि रक्तपित्त हराणि च।।115।।
कुमुदोत्पल- नालास्तु सपुष्पाः सफलाः स्मृताः।
शीताः स्वादुकषायास्तु कफमारूतकोपनाः।।117।।
कषायमीषाद्विगष्टम्भि रक्तपित्तहरं स्मृतम्।।118।।
पौष्करन्तु भवदे् बीजं मधुरं रस पाकयोः।(चरक)।।119।।
(च.सू.27/115-119)

4. नीलाब्जं शीतलं स्वादु सुगन्धि पित्तनाशनम्
रूच्यं रसायने श्रेष्ठं देह दाढर्यदकेशदम्।।113।।
(ध.नि.करवीरादिवर्ग 113)

5. नीलाब्जं शीतलं स्वादु सुगंधि पित्तनाशकृत
रूच्यं रसायने श्रेष्ठं कैश्यञ्च देहदाढर्यदम्।।181।।
(रा.नि.करवीरादिवर्ग 181)

6. ईषत् श्वेतं पद्मं नलिनं च तदुक्तमीषदारक्तम्
उत्पलं मीषान्नीलं त्रिविधमितीद भवेत् कमलम्।।182।।
उत्पलादिस्यं दाहरक्तपित्त प्रसादनः
पिपासादाहहृद्रोग- च्छर्दिमूर्च्छाहरो गणः।।183।।
(रा.नि.करवीरादिवर्ग 182- 183)

7. सतिक्तं मधुरं शीतं पद्मं पित्तकफापहम्
मधुरं पिच्छिलं स्निग्धं कुमुदं हलादि शीतलम्।
तस्यादल्पान्तरगुणे विद्यात् कुवलयोत्पले।।
(सु.सू. 46)

## उशीर (मूल)

उशीर दाहत्वग्दोषस्वेदापनयन प्रलेपानाम्।
(च.सू.25/40)

उशीर चामृणालं स्यादभयं समगन्धिकम्।
रणप्रियं वीरतरू वीरं वीरणमूलकम्।।13।।
उशीरं शीतलं तिक्तं दाहक्लान्तिहरं च तत्।।
वातघ्नं ज्वरतृण्मेहनुद्ररक्त हन्ति योगतः ।।
उशीरं स्वेददौर्गन्ध्य पित्तघ्नं स्निग्धतिक्तकम्।
(ध. नि. चन्दनादि वर्ग.13-14)

वीरणस्य तु मूलं स्यादुशीरं नलदं च तत्।
अमृणालंच सेव्यंच समगन्धिक मित्यपि।।86।।

उशीरं पाचनं शीतं स्तम्भनं लघु तिक्तकम्।।
मधुरं ज्वर हृद्वान्ति मदनुत्कफपित्तहत्।
तृष्णाऽस्रविषबीसर्प दाह कृच्छ्व्रणापहम्।।
(भा. प्र. कर्पूरादि वर्ग 86-88)

## उत्पल (पुष्प)

कुमुदं पिच्छिलं स्निग्धं मधुरं हलादि शीतलम्।।15।।
(भा.प्र.पुष्पवर्ग 15)

कुमुदं पिच्छिलं स्निग्धं मधुरं हलादि शीतलम्।।1453।।
(कै.दे.नि. औषधिवर्ग 1453)

उत्पलानि कषायाणि रक्तपित्त हराणि च।115।
कुमुदोत्पल-नालास्तु सपुष्पाः सफलाः स्मृताः।।
शीताः स्वादुकषायास्तु कफमारूतकोपनाः।।117।।
कषायमीषद्विष्टम्भि रक्तपित्तहरं स्मृतम्।118।
पोष्करन्तु भवेद् बीजं मधुरं रस पाकयोः ।। 119 ।।
(च.सं., सू. 27/115-119)

नीलाब्जं शीतलं स्वादु सुगन्धि पित्तनाशनम्।
रूच्यं रसायने श्रेष्ठ देहदार्ढ्यदकेशदम।। 113।।
(ध.नि.करवीरादि वर्ग,113)

नीलाब्जं शीतलं स्वादु सुगन्धि पित्तनाशकृत्।।
रूच्यं रसायने श्रेष्ठं केश्यच देहदार्ढ्यदम्।।
(रा.नि.करवीरादिवर्ग, 181)

ईषत्श्वेतं पद्मं नलिनं च तदुक्तमीषदारक्तम्।
उत्पलं मीषान्नीलं त्रिविधमितीदं भवेत् कमलम्।।182।।

उत्पलादिरयं दाहरक्तपित्त प्रसादनः।
पिपासादाह हृदोगच्छर्द्रिमूर्च्छाहरो गणः ।।183।।
(रा.नि.करवीरादिवर्ग 182-183)

सतिक्तं मधुरं शीतं पद्मं पित्तकफापहम्।।
मधुरं पिच्छिलं स्निग्धं कुमुदं ह्लादि शीतलम्।।
तस्मादल्पान्तरगुणे विद्यात् कुवलयोत्पले ।। 285।।
(सु. सं. सूं. 46/285)